# shrIkRiShNakarNAmRitam

# શ્રીકૃષ્ણકર્ણામૃતમ્

## Document Information

Text title : kRiShNakarNAmRitam

File name : kkarna.itx

Category : vishhnu, krishna, vishnu

Location : doc_vishhnu

Author : Kavi Bilvamangala (Lilasuka)

Transliterated by : P. P. Narayanaswami (swami at math.mun.ca)

Proofread by : P. P. Narayanaswami (swami at math.mun.ca), PSA EASWARAN

Latest update : May 23, 2012

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 17, 2022

*sanskritdocuments.org*

# શ્રીકૃષ્ણકર્ણામૃતમ્

## ॥ પ્રથમાશ્વાસઃ ॥

ચિન્તામણિર્જયતિ સોમગિરિર્ગુરુર્મે
શિક્ષાગુરુશ્ચ ભગવાન્ શિખિપિઞ્છમૌલિઃ ।
યત્પાદકલ્પતરુપલ્લવશેખરેષુ
લીલાસ્વયંવરરસં લભતે જયશ્રીઃ ॥ ૧.૧॥

અસ્તિ સ્વસ્તરુણીકરાગ્રવિગલત્કલ્પપ્રસૂનાપ્લુતં
વસ્તુપ્રસ્તુતવેણુનાદલહરીનિર્વાણનિર્વ્યાકુલમ્ ।
સ્રસ્તસ્રસ્તનિરુદ્ધનીવિવિલસદ્ગોપીસહસ્રાવૃતં
હસ્તન્યસ્તનતાપવર્ગમખિલોદારં કિશોરાકૃતિ ॥ ૧.૨॥

ચાતુર્યૈકનિધાનસીમચપલાઽપાઙ્ગચ્છટામન્દરં
લાવણ્યામૃતવીચિલાલિતદૃશં લક્ષ્મીકટક્ષાદૃતમ્ ।
કાલિન્દીપુલિનાઙ્ગણપ્રણયિનં કામાવતારાઙ્કુરં
બાલં નીલમમી વયં મધુરિમસ્વારાજ્યમારાધ્નુમઃ ॥ ૧.૩॥

બર્હોત્તંસવિલાસિકુન્તલભરં માધુર્યમગ્નાનનં
પ્રોન્મીલન્નવયૌવનં પ્રવિલસદ્વેણુપ્રણાદામૃતમ્ ।
આપીનસ્તનકુડ્મલાભિરભિતો ગોપીભિરારાધિતં
જ્યોતિશ્ચેતસિ નશ્ચકાસ્તિ જગતામેકાભિરામાદ્ભુતમ્ ॥ ૧.૪॥

મધુરતરસ્મિતામૃતવિમુગ્ધમુખામ્બુરુહં
મદશિખિપિઞ્છલાઞ્છિતમનોજ્ઞકચપ્રચયમ્ ।
વિષયવિષામિષગ્રસનગૃધ્નુષિ ચેતસિ મે
વિપુલવિલોચનં કિમપિ ધામ ચકાસ્તિ ચિરમ્ ॥ ૧.૫॥

મુકુલાયમાનનયનામ્બુજં વિભોર્મુરલીનિનાદમકરન્દનિર્ભરમ્ ।
મુકુરાયમાણમૃદુગણ્ડમણ્ડલં મુખપઙ્કજં મનસિ મે વિજૃમ્ભતામ્ ॥ ૧.૬॥

કમનીયકિશોરમુગ્ધમૂર્તેઃ કલવેણુક્વણિતાદૃતાનનેન્દોઃ ।
મમ વાચિ વિજૃમ્ભતાં મુરારેર્મધુરિમ્ણઃ કણિકાપિ કાપિ કાપિ ॥ ૧.૭॥

મદશિખણ્ડિશિખણ્ડવિભૂષણં મદનમન્થરમુગ્ધમુખાંબુજમ્ ।
વ્રજવધૂનયનાઞ્જનરઞ્જિતં વિજયતાં મમ વાઙ્મયજીવિતમ્ ॥ ૧.૮॥

પલ્લવારુણપાણિપઙ્કજસઙ્ગિવેણુરવાકુલં
ફુલ્લપાટલપાટલીપરિવાદિપાદસરોરુહમ્ ।
ઉલ્લસન્મધુરાધરદ્યુતિમઞ્જરીસરસાનનં
વલ્લવીકુચકુમ્ભકુઙ્કુમપઙ્કિલં પ્રભુમાશ્રયે ॥ ૧.૯॥

અપાઙ્ગરેખાભિરભઙ્ગુરાભિરનઙ્ગલીલારસરઞ્જિતાભિઃ ।
અનુક્ષણં વલ્લવસુન્દરીભિરભ્યર્ચ્યમાનં વિભુમાશ્રયામઃ ॥ ૧.૧૦॥

હૃદયે મમ હૃદ્યવિભ્રમાણાં હૃદયં હર્ષવિશાલલોલનેત્રમ્ ।
તરુણં વ્રજબાલસુન્દરીણાં તરલં કિઞ્ચન ધામ સન્નિધત્તામ્ ॥ ૧.૧૧॥

નિખિલભુવનલક્ષ્મીનિત્યલીલાસ્પદાભ્યાં
કમલવિપિનવીથીગર્વસર્વઙ્કષાભ્યામ્ ।
પ્રણમદભયદાનપ્રૌઢગાઢોદ્ધતાભ્યાં
કિમપિ વહતુ ચેતઃ કૃષ્ણપાદામ્બુજાભ્યામ્ ॥ ૧.૧૨॥

પ્રણયપરિણતાભ્યાં પ્રાભવાલમ્બનાભ્યાં
પ્રતિપદલલિતાભ્યાં પ્રત્યહં નૂતનાભ્યામ્ ।
પ્રતિમુહુરધિકાભ્યાં પ્રસ્નુવલ્લોચનાભ્યાં
પ્રભવતુ હૃદયે નઃ પ્રાણનાથઃ કિશોરઃ ॥ ૧.૧૩॥

માધુર્યવારિધિમદાન્ધતરઙ્ગભઙ્ગીશૃઙ્ગારસંકલિતશીતકિશોરવેષમ્ ।
આમન્દહાસલલિતાનનચન્દ્રબિમ્બમાનન્દસમ્પ્લવમનુપ્લવતાં મનો મે ॥ ૧.૧૪॥

અવ્યાજમઞ્જુલમુખામ્બુજમુગ્ધભાવૈરાસ્વાદ્યમાનનિજવેણુવિનોદનાદમ્ ।
આક્રીડતામરુણપાદસરોરુહાભ્યામાર્દ્રે મદીયહૃદયે ભુવનાર્દ્રમોજઃ ॥ ૧.૧૫॥

મણિનૂપુરવાચાલં વન્દે તચ્ચરણં વિભોઃ ।
લલિતાનિ યદીયાનિ લક્ષ્માણિ વ્રજવીથિષુ ॥ ૧.૧૬॥

મમ ચેતસિ સ્ફુરતુ વલ્લવીવિભોર્મણિનૂપુરપ્રણયિમઞ્જુશિઞ્જિતમ્ ।
કમલાવનેચરકલિન્દકન્યકાકલહંસકણ્ઠકલકૂજિતાદૃતમ્ ॥ ૧. ૧૭॥

તરુણારુણકરુણામયવિપુલાયતનયનં
કમલાકુચકલશીભરપુલકીકૃતહૃદયમ્ ।
મુરલીરવતરલીકૃતમુનિમાનસનલિનં
મમ ખેલતિ મદચેતસિ મધુરાધરમમૃતમ્ ॥ ૧.૧૮॥

આમુગ્ધમર્ધનયનામ્બુજચુમ્બ્યમાન-
હર્ષાકુલવ્રજવધૂમધુરાનનેન્દોઃ ।
આરબ્ધવેણુરવમાદિકિશોરમૂર્તે-
રાવિર્ભવન્તિ મમ ચેતસિ કેઽપિ ભાવાઃ ॥ ૧.૧૯॥

કલક્વણિતકઙ્કણં કરનિરુદ્ધપીતામ્બરં
ક્રમપ્રસૃતકુન્તલં કલિતબર્હભૂષં વિભોઃ ।
પુનઃ પ્રસૃતિચાપલં પ્રણયિનીભુજાયન્ત્રિતં
મમ સ્ફુરતુ માનસે મદનકેલિશય્યોત્થિતમ્ ॥ ૧.૨૦॥

સ્તોકસ્તોકનિરુધ્યમાનમૃદુલપ્રસ્યન્દિમન્દસ્મિતં
પ્રેમોદ્ભેદનિરર્ગલપ્રસૃમરપ્રવ્યક્તરોમોદ્ગમમ્ ।
શ્રોતૃશ્રોત્રમનોહરવ્રજવધૂલીલામિથો જલ્પિતં
મિથ્યાસ્વાપમુપાસ્મહે ભગવતઃ ક્રીડાનિમીલદ્દૃશઃ ॥ ૧.૨૧॥

વિચિત્રપત્રાઙ્કુરશાલિબાલાસ્તનાન્તરં મૌનિમનોઽન્તરં વા ।
અપાસ્ય વૃન્દાવનપાદપાસ્યમુપાસ્યમન્યન્ન વિલોકયામઃ ॥ ૧.૨૨॥

સાર્ધં સમૃદ્ધૈરમૃતાયમાનૈરાધ્યાયમાનૈર્મુરલીનિનાદૈઃ ।
મૂર્ધાભિષિક્તં મધુરાકૃતીનાં બાલં કદા નામ વિલોકયિષ્યે ॥ ૧.૨૩॥

શિશિરીકુરુતે કદા નુ નઃ શિખિપિઞ્છાભરણશ્શિશુર્દૃશોઃ ।
યુગલં વિગલન્મધુદ્રવસ્મિતમુદ્રામૃદુના મુખેન્દુના ॥ ૧.૨૪॥

કારુણ્યકર્બુરકટાક્ષનિરીક્ષણેન તારુણ્યસંવલિતશૈશવવૈભવેન ।
આપુષ્ણતા ભુવનમદ્ભુતવિભ્રમેણ શ્રીકૃષ્ણચન્દ્ર શિશિરીકુરુ લોચનં મે ॥ ૧.૨૫॥

કદા વા કાલિન્દીકુવલયદલશ્યામલતરાઃ
કટાક્ષા લક્ષ્યન્તે કિમપિ કરુણાવીચિનિચિતાઃ ।
કદા વા કન્દર્પપ્રતિભટજટાચન્દ્રશિશિરાઃ
કિમપ્યન્તસ્તોષં દદતિ મુરલીકેલિનિનદાઃ ॥ ૧.૨૬॥

અધીરમાલોકિતમાર્દ્રજલ્પિતં ગતં ચ ગંભીરવિલાસમન્થરમ્ ।
અમન્દમાલિઙ્ગિતમાકુલોન્મદસ્મિતં ચ તે નાથ વદન્તિ ગોપિકાઃ ॥ ૧.૨૭॥

અસ્તોકસ્મિતભરમાયતાયતાક્ષં નિઃશેષસ્તનમૃદિતં વ્રજાઙ્ગનાભિઃ ।
નિસ્સીમસ્તબકિતનીલકાન્તિધારં દૃશ્યાસં ત્રિભુવનસુન્દરં મહસ્તે ॥ ૧.૨૮॥

મયિ પ્રસાદં મધુરૈઃ કટાક્ષૈર્વંશીનિનાદાનુચરૈર્વિધેહિ ।
ત્વયિ પ્રસન્ને કિમિહાપરૈર્નસ્ત્વય્યપ્રસન્ને કિમિહાપરૈર્નઃ ॥ ૧.૨૯॥

નિબદ્ધમુગ્ધાઞ્જલિરેષ યાચે નીરન્ધ્રદૈન્યોન્નતમુક્તકણ્ઠમ્ ।
દયામ્બુધે દેવ ભવત્કટાક્ષદાક્ષિણ્યલેશેન સકૃન્નિષિઞ્ચ ॥ ૧.૩૦॥

પિઞ્છાવતંસરચનોચિતકેશપાશે પીનસ્તનીનયનપઙ્કજપૂજનીયે ।
ચન્દ્રારવિન્દવિજયોદ્યતવક્ત્રબિમ્બે ચાપલ્યમેતિ નયનં તવ શૈશવે નઃ ॥ ૧.૩૧॥

ત્વચ્છૈશવં ત્રિભુવનાદ્ભુતમિત્યવૈમિ યચ્ચાપલં ચ મમ વાગવિવાદગમ્યમ્ ।
તત્ કિં કરોમિ વિરણન્મુરલીવિલાસમુગ્ધં મુખામ્બુજમુદીક્ષિતુમીક્ષણાભ્યામ્ ॥ ૧.૩૨॥

પર્યાચિતામૃતરસાનિ પદાર્થભઙ્ગીફલ્ગૂનિ વલ્ગિતવિશાલવિલોચનનાનિ ।
બાલ્યાધિકાનિ મદવલ્લવભાવિતાનિ ભાવે લુઠન્તિ સુદૃશાં તવ જલ્પિતાનિ ॥ ૧.૩૩॥

પુનઃ પ્રસન્નેન મુખેન્દુતેજસા પુરોઽવતીર્ણસ્ય કૃપામહામ્બુધેઃ ।
તદેવ લીલામુરલીરવામૃતં સમાધિવિઘ્નાય કદા નુ મે ભવેત્ ॥ ૧.૩૪॥

ભાવેન મુગ્ધચપલેન વિલોકનેન મન્માનસે કિમપિ ચાપલમુદ્વહન્તમ્ ।
લોલેન લોચનરસાયનમીક્ષણેન લીલાકિશોરમુપગૂહિતુમુત્સુકોઽસ્મિ ॥ ૧.૩૫॥

અધીરબિમ્બાધરવિભ્રમેણ હર્ષાર્દ્રવેણુસ્વરસમ્પદા ચ ।
અનેન કેનાપિ મનોહરેણ હા હન્ત હા હન્ત મનો ધુનોતિ ॥ ૧.૩૬॥

યાવન્ન મે નિખિલમર્મદૃઢાભિઘાતનિસ્સન્ધિબન્ધનમુદેત્યસવોપતાપઃ ।
તાવદ્વિભો ભવતુ તાવકવક્ત્રચન્દ્રચન્દ્રાતપદ્વિગુણિતા મમ ચિત્તધારા ॥ ૧.૩૭॥

યાવન્ન મે નરદશા દશમી દૃશોઽપિ રન્ધ્રાદુદેતિ તિમિરીકૃતસર્વભાવા ।
લાવણ્યકેલિભવનં તવ તાવદેતુ લક્ષ્મ્યાઃ સમુત્ક્વણિતવેણુમુખેન્દુબિમ્બમ્ ॥ ૧.૩૮॥

આલોલલોચનવિલોકિતકેલિધારાનીરાજિતાગ્રસરણેઃ કરુણામ્બુરાશેઃ ।
આર્દ્રાણિ વેણુનિનદૈઃ પ્રતિનાદપૂરૈરાકર્ણયામિ મણિનૂપુરશિઞ્જિતાનિ ॥ ૧.૩૯॥

હે દેવ હે દયિત હે જગદેકબન્ધો કે કૃષ્ણ હે ચપલ હે કરુણૈકસિન્ધો ।
હે નાથ હે રમણ હે નયનાભિરામ હા હા કદા નુ ભવિતાસિ પદં દૃશોર્મે ॥ ૧.૪૦॥

અમૂન્યધન્યાનિ દિનાન્તરાણિ હરે ત્વદાલોકનમન્તરેણ ।
અનાથબન્ધો કરુણૈકસિન્ધો હા હન્ત હા હન્ત કથં નયામિ ॥ ૧.૪૧॥

કિમિવ શ‍ૃણુમઃ કસ્ય બ્રૂમઃ કથં કૃતમાશયા
કથયત કથાં ધન્યામન્યામહો હૃદયેશયઃ ।
મધુરમધુરસ્મેરાકારે મનોનયનોત્સવે
કૃપણકૃપણા કૃષ્ણે તૃષ્ણા ચિરં બત લમ્બતે ॥ ૧.૪૨॥

આભ્યાં વિલોચનાભ્યામમ્બુજદલલલિતલોચનં બાલમ્ ।
દ્વાભ્યામપિ પરિરબ્ધું દૂરે મમ હન્ત દૈવસમાગ્રી ॥ ૧.૪૩॥

અશ્રાન્તસ્મિતમરુણારુણાધરોષ્ઠં હર્ષાર્દ્રદ્વિગુણમનોજ્ઞવેણુગીતમ્ ।
વિભ્રામ્યદ્વિપુલવિલોચનાર્ધમુગ્ધં વીક્ષિષ્યે તવ વદનામ્બુજં કદા નુ ॥ ૧.૪૪॥

લીલાયતાભ્યાં રસશીતલાભ્યાં નીલારુણાભ્યાં નયનામ્બુજાભ્યામ્ ।
આલોકયેદદ્ભુતવિભ્રમાભ્યાં બાલઃ કદા કારુણિકઃ કિશોરઃ ॥ ૧.૪૫॥

બહુલચિકુરભારં બદ્ધપિઞ્છાવતંસં ચપલચપલનેત્રં ચારુબિમ્બાધરોષ્ઠમ્ ।
મધુરમૃદુલહાસં મન્થરોદારલીલં મૃગયતિ નયનં મે મુગ્ધવેષં મુરારેઃ ॥ ૧.૪૬॥

બહુલજલદચ્છાયાચોરં વિલાસભરાલસં
મદશિખિશિખાલીલોત્તંસં મનોજ્ઞમુખામ્બુજમ્ ।
કમપિ કમલાપાઙ્ગોદગ્રપ્રપન્નજગજ્જિતં
મધુરિમપરીપાકોદ્રેકં વયં મૃગયામહે ॥ ૧.૪૭॥

પરામૃશ્યં દૂરે પરિષદિ મુનીનાં વ્રજવધૂ-
દૃશાં દૃશ્યં શશ્વત્ ત્રિભુવનમનોહારિવપુષમ્ ।
અનામૃશ્યં વાચામનિદમુદયાનામપિ કદા
દરીદૃશ્યે દેવ દરદલિતનીલોત્પલનિભમ્ ॥ ૧.૪૮॥

લીલાનનામ્બુજમધીરમુદીક્ષમાણં
નર્માણિ વેણુવિવરેષુ નિવેશયન્તમ્ ।
ડોલાયમાનનયનં નયનાભિરામં
દેવં કદા નુ દયિતં વ્યતિલોકયિષ્યે ॥ ૧.૪૯॥

લગ્નં મુહુર્મનસિ લમ્પટસમ્પ્રદાયિ-
લેખાવિલેખનરસજ્ઞમનોજ્ઞવેષમ્ ।

લજ્જન્મૃદુસ્મિતમધુસ્નપિતાધરાંશુ-
રાકેન્દુલાલિતમુખેન્દુમુકુન્દબાલ્યમ્ ॥ ૧.૫૦॥

અહિમકરકરનિકરમૃદુમૃદિતલક્ષ્મી-
સરસતરસરસિરુહસદૃશદૃશિ દેવે ।
વ્રજયુવતિરતિકલહવિજયિનિજલીલા-
મદમુદિતવદનશશિમધુરિમણિ લીયે ॥ ૧.૫૧॥

કરકમલદલદલિતલલિતતરવંશી
કલનિનદગલદમૃતઘનસરસિ દેવે ।
સહજરસભરભરિતદરહસિતવીથી-
સતતવહદધરમણિમધુરિમણિ લીયે ॥ ૧.૫૨॥

કુસુમશરશરસમરકુપિતમદગોપી-
કુચકલશઘુસૃણરસલસદુરસિ દેવે ।
મદલુલિતમૃદુહસિતમુષિતશશિશોભા-
મુહુરધિકમુખકમલમધુરિમણિ લીયે ॥ ૧.૫૩॥

આનમ્રામસિતભ્રુવોરુપચિતામક્ષીણપક્ષ્માઙ્કુરે-
ષ્વાલોલામનુરાગિણોર્નયનયોરાર્દ્રાં મૃદૌ જલ્પિતે ।
આતામ્રામધરામૃતે મદકલામમ્લાનવંશીરવે-
ષ્વાશાસ્તે મમ લોચનં વ્રજશિશોર્મૂર્તિં જગન્મોહિનીમ્ ॥ ૧.૫૪॥

તત્કૈશોરં તચ્ચ વક્ત્રારવિન્દં તત્કારુણ્યં તે ચ લીલાકટાક્ષાઃ ।
તત્સૌન્દર્યં સા ચ મન્દસ્મિતશ્રીઃ સત્યં સત્યં દુર્લભં દૈવતેષુ ॥ ૧.૫૫॥

વિશ્વોપપ્લવશમનૈકબદ્ધદીક્ષં વિશ્વાસસ્તવકિતચેતસાં જનાનામ્ ।
પશ્યામઃ પ્રતિનવકાન્તિકન્દલાર્દ્રં પશ્યામઃ પથિ પથિ શૈશવં મુરારેઃ ॥ ૧.૫૬॥

મૌલિશ્ચન્દ્રકભૂષણા મરકતસ્તમ્ભાભિરામં વપુ-
ર્વક્ત્રં ચિત્રવિમુગ્ધહાસમધુરં બાલે વિલોલે દૃશૌ ।
વાચશ્શૈશવશીતલામદગજશ્લાઘ્યા વિલાસસ્થિતિ-
ર્મન્દં મન્દમયે ક એષ મથુરાવીથીમિતો ગાહતે ॥ ૧.૫૭॥

પાદૌ પાદવિનિર્જિતામ્બુજવનૌ પદ્માલયાલઙ્કૃતૌ
પાણી વેણુવિનોદનપ્રણયિનૌ પર્યન્તશિલ્પશ્રિયૌ ।
બાહૂ દોહદભાજનં મૃગદૃશાં માધુર્યધારા ગિરો

વક્ત્રં વાગ્વિભવાતિલઙ્ઘિતમહો બાલં કિમેતન્મહઃ ॥ ૧.૫૮॥

બર્હં નામ વિભૂષણં બહુમતં વેષાય શેષૈરલં
વક્ત્રં દ્વિત્રિવિશેષકાન્તિલહરીવિન્યાસધન્યાધરમ્ ।
શીલૈરલ્પધિયામગમ્યવિભવૈઃ શ‍ૃઙ્ગારભઙ્ગીમયં
ચિત્રં ચિત્રમહો વિચિત્રમહહો ચિત્રં વિચિત્રં મહઃ ॥ ૧૧.૫૯॥

અગ્રે સમગ્રયતિ કામપિ કેલિલક્ષ્મી-
મન્યાસુ દિક્ષ્વપિ વિલોચનમેવ સાક્ષી ।
હા હન્ત હસ્તપથદૂરમહો કિમેત-
દાસીત્ કિશોરમયમમ્બ જગત્ત્રયં મે ॥ ૧.૬૦॥

ચિકુરં બહુલં વિરલં ભ્રમરં મૃદુલં વચનં વિપુલં નયનમ્ ।
અધરં મધુરં વદનં લલિતં ચપલં ચરિતન્તુ કદાઽનુભવે ॥ ૧.૬૧॥

પરિપાલય નઃ કૃપાલયેત્યસકૃજ્જલ્પિતમાત્મબાન્ધવઃ ।
મુરલીમૃદુલસ્વનાન્તરે વિભુરાકર્ણયિતા કદા નુ નઃ ॥ ૧.૬૨॥

કદા નુ કસ્યાં નુ વિપદ્દશાયાં કૈશોરગન્ધિઃ કરુણામ્બુધિર્નઃ ।
વિલોચનાભ્યાં વિપુલાયતાભ્યાં વ્યાલોકયિષ્યન્ વિષયીકરોતિ ॥ ૧.૬૩॥

મધુરમધરબિમ્બે મઞ્જુલં મન્દહાસે શિશિરમમૃતવાક્યે શીતલં દૃષ્ટિપાતે ।
વિપુલમરુણનેત્રે વિશ્રુતં વેણુનાદે મરકતમણિનીલં બાલમાલોકયે નુ ॥ ૧.૬૪॥

માધુર્યાદપિ મધુરં મન્મથતાતસ્ય કિમપિ કૈશોરમ્ ।
ચાપલ્યાદપિ ચપલં ચેતો મમ હરતિ હન્ત કિં કુર્મઃ ॥ ૧.૬૫॥

વક્ષઃસ્થલે ચ વિપુલં નયનોત્પલે ચ મન્દસ્મિતે ચ મૃદુલં મદજલ્પિતે ચ ।
બિમ્બાધરે ચ મધુરં મુરલીરવે ચ બાલં વિલાસનિધિમાકલયે કદા નુ ॥ ૧.૬૬॥

આર્દ્રાવલોકિતદયાપરિણદ્ધનેત્રમાવિષ્કૃતસ્મિતસુધામધુરાધરોષ્ઠમ્ ।
આદ્યં પુમાંસમવતંસિતબર્હિબર્હમાલોકયન્તિ કૃતિનઃ કૃતપુણ્યપુઞ્જાઃ ॥ ૧.૬૭॥

મારઃ સ્વયં નુ મધુરદ્યુતિમણ્ડલં નુ માધુર્યમેવ નુ મનોનયનામૃતં નુ ।
વાણીમૃજા નુ મમ જીવિતવલ્લભો નુ બાલોઽયમભ્યુદયતે મમ લોચનાય ॥ ૧.૬૮॥

બાલોઽયમાલોલવિલોચનેન વક્ત્રેણ ચિત્રીકૃતદિઙ્મુખેન ।
વેષેણ ઘોષોચિતભૂષણેન મુગ્ધેન દુગ્ધે નયનોત્સુકં નઃ ॥ ૧.૬૯॥

આન્દોલિતાગ્રભુજમાકુલનેત્રલીલમાર્દ્રસ્મિતાર્દ્રવદનામ્બુજચન્દ્રબિમ્બમ્ ।

શિઞ્જાનભૂષણશતં શિખિપિઞ્છમૌલિં શીતં વિલોચનરસાયનમભ્યુપૈતિ ॥ ૧.૭૦॥

પશુપાલપાલપરિષદ્વિભૂષણં શિશુરેષ શીતલવિલોલલોચનઃ ।
મૃદુલસ્મિતાર્દ્રવદનેન્દુસમ્પદા મદયન્મદીયહૃદયં વિગાહતે ॥ ૧.૭૧॥

var De's version has additional verse. Numbers are not changed wi De's.
કિમિદમધરવીથીક્લૃપ્તવંશીનિનાદં કિરતિ નયનયોર્નઃ કામપિ પ્રેમધારામ્ ।
તદિદમમરવીથીદુર્લભં વલ્લભં નઃ ત્રિભુવનકમનીયં દૈવતં જીવિતં
ચ ॥ ૧.૭૨॥

var

તદિદમુપનતં તમાલનીલં તરલવિલોચનતારકાભિરામમ્ ।
મુદિતમુદિતવક્ત્રચન્દ્રબિમ્બં મુખરિતવેણુવિલાસજીવિતં મે ॥ ૧.૭૨॥

ચાપલ્યસીમ ચપલાનુભવૈકસીમ ચાતુર્યસીમ ચતુરાનનશિલ્પસીમ ।
સૌરભ્યસીમ સકલાદ્ભુતકેલિસીમ સૌભાગ્યસીમ તદિદં વ્રજભાગ્યસીમ ॥ ૧.૭૩॥

માધુર્યેણ દ્વિગુણશિશિરં વક્ત્રચન્દ્રં વહન્તી
વંશીવીથીવિગલદમૃતસ્રોતસા સેચયન્તી ।
મદ્વાણીનાં વિહરણપદં મત્તસૌભાગ્યભાજાં
મત્પુણ્યાનાં પરિણતિરહો નેત્રયોસ્સન્નિધત્તે ॥ ૧.૭૪॥

તેજસેઽસ્તુ નમો ધેનુપાલિને લોકપાલિને ।
રાધાપયોધરોત્સઙ્ગશાયિને શેષશાયિને ॥ ૧.૭૫॥

ધેનુપાલદયિતાસ્તનસ્થલીધન્યકુઙ્કુમસનાથકાન્તયે ।
વેણુગીતગતિમૂલવેધસે તેજસે તદિદમોં નમો નમઃ ॥ ૧.૭૬॥

મૃદુક્વણન્નૂપુરમન્થરેણ બાલેન પાદામ્બુજપલ્લવેન ।
અનુક્વણન્મઞ્જુલવેણુગીતમાયાતિ મે જીવિતમાત્તકેલિ ॥ ૧.૭૭॥

સોઽયં વિલાસમુરલીનિનદામૃતેન સિઞ્ચન્નુદઞ્ચિતમિદં મમ કર્ણયુગ્મમ્ ।
આયાતિ મે નયનબન્ધુરનન્યબન્ધુરાનન્દકન્દલિતકેલિકટાક્ષલક્ષ્યઃ ॥ ૧.૭૮॥

દૂરાદ્વિલોકયતિ વારણખેલગામી ધારાકટાક્ષભરિતેન વિલોચનેન ।
આરાદુપૈતિ હૃદયઙ્ગમવેણુનાદવેણીદુઘેન દશનાવરણેન દેવઃ ॥ ૧.૭૯॥

ત્રિભુવનસરસાભ્યાં દીપ્તભૂષાપદાભ્યાં
દૃશિ દૃશિ શિશિરાભ્યાં દિવ્યલીલાકુલાભ્યામ્ ।

અશરણશરણાભ્યામદ્ભુતાભ્યાં પદાભ્યા-
મયમયમનુકૂજદ્વેણુરાયાતિ દેવઃ ॥ ૧.૮૦॥

સોऽયં મુનીન્દ્રજનમાનસતાપહારી સોऽયં મદવ્રજવધૂવસનાપહારી ।
સોऽયં તૃતીયભુવનેશ્વરદર્પહારી સોऽયં મદીયહૃદયામ્બુરુહાપહારી ॥ ૧.૮૧॥

સર્વજ્ઞત્વે ચ મૌગ્ધ્યે ચ સાર્વભૌમમિદં મમ ।
નિર્વિશન્નયનં તેજો નિર્વાણપદમશ્નુતે ॥ ૧.૮૨॥

પુષ્ણાનમેતત્પુનરુક્તશોભમુષ્ણેતરાંશોરુદયાન્મુખેન્દોઃ ।
તૃષ્ણામ્બુરાશિં દ્વિગુણીકરોતિ કૃષ્ણાહ્વયં કિઞ્ચન જીવિતં મે ॥ ૧.૮૩॥

તદેતદાતામ્રવિલોચનશ્રીસમ્ભાવિતાશેષવિનમ્રવર્ગમ્ ।
મુહુર્મુરારેર્મધુરાધરોષ્ઠં મુખામ્બુજં ચુમ્બતિ માનસં મે ॥ ૧.૮૪॥

કરૌ શરદુદઞ્ચિતામ્બુજવિલાસશિક્ષાગુરૂ
પદૌ વિબુધપાદપપ્રથમપલ્લવોલ્લઙ્ઘિનૌ ।
દૃશૌ દલિતદુર્મદત્રિભુવનોપમાનશ્રિયૌ
વિલોક્ય સુવિલોચનામૃતમહો મહચ્છૈશવમ્ ॥ ૧.૮૫॥

આચિન્વાનમહન્યહન્યહનિ સાકારાન્ વિહારક્રમા-
નારુન્ધાનમરુન્ધતીહૃદયમપ્યાર્દ્રસ્મિતાસ્યશ્રિયા ।
આતન્વાનમનન્યજન્મનયનશ્લાઘ્યામનર્ઘ્યાં દશા-
માનન્દં વ્રજસુન્દરીસ્તનતટીસામ્રાજ્યમાજ્જૃમ્ભતે ॥ ૧.૮૬॥

સમુચ્છ્વસિતયૌવનં તરલશૈશવાલઙ્કૃતં
મદચ્છુરિતલોચનં મદનમુગ્ધહાસામૃતમ્ ।
પ્રતિક્ષણવિલોકનં પ્રણયપીતવંશીમુખં
જગત્ત્રયવિમોહનં જયતિ મામકં જીવિતમ્ ॥ ૧.૮૭॥

ચિત્રં તદેતચ્ચરણારવિન્દં ચિત્રં તદેતન્નયનારવિન્દમ્ ।
ચિત્રં તદેતદ્વદનારવિન્દં ચિત્રં તદેતત્પુનરમ્બ ચિત્રમ્ ॥ ૧.૮૮॥

અખિલભુવનૈકભૂષમધિભૂષિતજલધિદુહિતૃકુચકુમ્ભમ્ ।
વ્રજયુવતીહારવલ્લીમરકતનાયકમહામણિં વન્દે ॥ ૧.૮૯॥

કાન્તાકચગ્રહણવિગ્રહબદ્ધલક્ષ્મીખણ્ડાઙ્ગરાગરસરઞ્જિતમઞ્જુલશ્રીઃ ।
ગણ્ડસ્થલીમુકુરમણ્ડલખેલમાનઘર્માઙ્કુરં કિમપિ ખેલતિ કૃષ્ણતેજઃ ॥ ૧.૯૦॥

મધુરં મધુરં વપુરસ્ય વિભોર્મધુરં મધુરં વદનં મધુરમ્ ।
મધુગન્ધિ મૃદુસ્મિતમેતદહો મધુરં મધુરં મધુરં મધુરમ્ ॥ ૧.૯૧॥

શ‌ૃઙ્ગારરસસર્વસ્વં શિખિપિઞ્છવિભૂષણમ્ ।
અઙ્ગીકૃતનરાકારમાશ્રયે ભુવનાશ્રયમ્ ॥ ૧.૯૨॥

નાદ્યાપિ પશ્યતિ કદાચન દર્શનેન ચિત્તેન ચોપનિષદા સુદૃશાં સહસ્રમ્ ।
સ ત્વં ચિરં નયનયોરનયોઃ પદવ્યાં સ્વામિન્ કયા નુ કૃપયા મમ સન્નિધત્સે ॥ ૧.૯૩॥

કેયં કાન્તિઃ કેશવ ત્વન્મુખેન્દોઃ કોઽયં વેષઃ કોઽપિ વાચામભૂમિઃ ।
સેયં સોઽયં સ્વાદુતા મઞ્જુલશ્રીઃ ભૂયો ભૂયો ભૂયશસ્તાં નમામિ ॥ ૧.૯૪॥

વદનેન્દુવિનિર્જિતશ્શશી દશધા દેવ પદં પ્રપદ્યતે ।
અધિકાં શ્રિયમશ્નુતેતરાં તવ કારુણ્યવિજૃમ્ભિતં કિયત્ ॥ ૧.૯૫॥

તત્ત્વન્મુખં કથમિવાબ્જસમાનકક્ષં વાઙ્માધુરીબહુલપર્વકલાસમૃદ્ધમ્ ।
તત્ કિં બ્રુવે કિમપરં ભુવનૈકકાન્તં યસ્ય ત્વદાનનસમા સુષમા સદા સ્યાત્ ॥ ૧.૯૬॥

શુશ્રૂષસે યદિ વચઃ શ‌ૃણુ મામકીનં પૂર્વૈરપૂર્વકવિભિર્ન કટાક્ષિતં યત્ ।
નીરાજનક્રમધુરં ભવદાનનેન્દોઃ નિર્વ્યાજમર્હતિ ચિરાયા શશિપ્રદીપઃ ॥ ૧.૯૭॥

અખણ્ડનિર્વાણરસપ્રવાહૈર્વિખણ્ડિતાશેષરસાન્તરાણિ ।
અયન્ત્રિતોદ્વાન્તસુધાર્ણવાનિ જયન્તિ શીતાનિ તવ સ્મિતાનિ ॥ ૧.૯૮॥

કામં સન્તુ સહસ્રશઃ કતિપયે સ્વારસ્યધૌરેયકાઃ
કામં વા કમનીયતાપરિણતિસ્વારાજ્યબદ્ધવ્રતાઃ ।
તૈર્નૈવં વિવદામહે ન ચ વયં દેવ પ્રિયં બ્રૂમહે
યત્સત્યં રમણીયતાપરિણતિસ્ત્વય્યેવ પારંગતા ॥ ૧.૯૯॥

મન્દારમૂલે મદનાભિરામં બિમ્બાધરાપૂરિતવેણુનાદમ્ ।
ગોગોપગોપીજનમધ્યસંસ્થં ગોપં ભજે ગોકુલપૂર્ણચન્દ્રમ્ ॥ ૧.૧૦૦॥

ગલદ્વ્રીડા લોલા મદનવનિતા ગોપવનિતા
મધુસ્ફીતં ગીતં કિમપિ મધુરા ચાપલધુરા ।
સમુજ્જૃમ્ભા ગુમ્ફા મધુરિમગિરાં માદૃશગિરાં
ત્વયિ સ્થાને જાતે દધતિ ચપલં જન્મ ચ ફલમ્ ॥ ૧.૧૦૧॥

ભુવનં ભવનં વિલાસિની શ્રીસ્તનયસ્તામરસાસનઃ સ્મરશ્ચ ।
પરિચારપરમ્પરાઃ સુરેન્દ્રાસ્તદપિ ત્વચ્ચરિતં વિભો વિચિત્રમ્ ॥ ૧.૧૦૨॥

દેવસ્ત્રિલોકસૌભાગ્યકસ્તૂરીતિલકાઙ્કુરઃ ।
જીયાદ્ વ્રજાઙ્ગનાનઙ્ગકેલીલલિતવિભ્રમઃ ॥ ૧.૧૦૩॥

પ્રેમદં ચ મે કામદં ચ મે વેદનં ચ મે વૈભવં ચ મે ।
જીવનં ચ મે જીવિતં ચ મે દૈવતં ચ મે દેવ નાપરમ્ ॥ ૧.૧૦૪॥

માધુર્યેણ વિજૃમ્ભન્તાં વાચો નસ્તવ વૈભવે ।
ચાપલ્યેન વિવર્ધન્તાં ચિન્તા નસ્તવ શૈશવે ॥ ૧.૧૦૫॥

યાનિ ત્વચ્ચરિતામૃતાનિ રસનાલેહ્યાનિ ધન્યાત્મનાં
યે વા ચાપલશૈશવવ્યતિકરા રાધાપરાધોન્મુખાઃ ।
યા વા ભાવિતવેણુગીતગતયો લીલામુખામ્ભોરુહે
ધારાવાહિકયા વહન્તુ હૃદયે તાન્યેવ તાન્યેવ મે ॥ ૧.૧૦૬॥

ભક્તિસ્ત્વયિ સ્થિરતરા ભગવન્ યદિ સ્યા-
દ્દૈવેન નઃ ફલિતદિવ્યકિશોરવેષે ।
મુક્તિઃ સ્વયં મુકુલિતાઞ્જલિ સેવતેઽસ્માન્
ધર્માર્થકામગતયઃ સમયપ્રતીક્ષાઃ ॥ ૧.૧૦૭॥

જય જય જય દેવ દેવ દેવ ત્રિભુવનમઙ્ગલદિવ્યનામધેય ।
જય જય જય બાલકૃષ્ણદેવ શ્રવણમનોનયનામૃતાવતાર ॥ ૧.૧૦૮॥

તુભ્યં નિર્ભરહર્ષવર્ષવિવશાવેશસ્ફુટાવિર્ભવદ્-
ભૂયશ્ચાપલભૂષિતેષુ સુકૃતાં ભાવેષુ નિર્ભાસતે ।
શ્રીમદ્ગોકુલમણ્ડનાય મહતે વાચાં વિદૂરસ્ફુટન્-
માધુર્યૈકરસાર્ણવાય મહસે કસ્મૈ ચિદસ્મૈ નમઃ ॥ ૧.૧૦૯॥

ઈશાનદેવચરણાભરણેન નીવીદામોદરસ્થિરયશઃ સ્તબકોદ્ગમેન ।
લીલાશુકેન રચિતં તવ દેવ કૃષ્ણકર્ણામૃતં વહતુ કલ્પશતાન્તરેઽપિ ॥ ૧.૧૧૦॥

var De's book has additional two verses
ધન્યાનાં સરસાનુલાપસરણીસૌરભ્યમભ્યસ્યતાં
કર્ણાનાં વિવરેષુ કામપિ સુધાવૃષ્ટિં દુહાનં મુહુઃ ।
વન્યાનાં સુદૃશાં મનોનયનયોર્મગ્નસ્ય દેવસ્ય નઃ
કર્ણાનાં વચસાં વિજૃમ્ભિતમહો કૃષ્ણસ્ય કર્ણામૃતમ્ ॥ ૧.૧૧૧॥

અનુગ્રહદ્વિગુણવિશાલલોચનૈરનુસ્મરન્ મૃદુમુરલીરવામૃતૈઃ ।
યતો યતઃ પ્રસરતિ મે વિલોચનં તતસ્તતઃ સ્ફુરતુ તવૈવ વૈભવમ્ ॥ ૧.૧૧૨॥

var

॥ ઇતિ શ્રીકૃષ્ણકર્ણામૃતે પ્રથમાશ્વાસઃ સમાપ્તઃ ॥

## ॥ દ્વિતીયાશ્વાસઃ ॥

અભિનવનવનીતસ્નિગ્ધમાપીતદુગ્ધં
દધિકણપરિદિગ્ધં મુગ્ધમઙ્ગં મુરારેઃ ।
દિશતુ ભુવનકૃચ્છ્રચ્છેદિ તાપિઞ્છગુચ્છ-
ચ્છવિ નવશિખિપિઞ્છા લાઞ્છિતં વાઞ્છિતં નઃ ॥ ૨.૧॥

યાં દૃષ્ટ્વા યમુનાં પિપાસુરનિશં વ્યૂહો ગવાં ગાહતે
વિદ્યુત્વાનિતિ નીલકણ્ઠનિવહો યાં દ્રષ્ટુમુત્કણ્ઠતે ।
ઉત્તંસાય તમાલપલ્લવમિતિ છિન્દન્તિ યાં ગોપિકાઃ
કન્તિઃ કાલિયશાસનસ્ય વપુષઃ સા પાવની પાતુ નઃ ॥ ૨.૨॥

દેવઃ પાયાત્પયસિ વિમલે યામુને મજ્જતીનાં
યાચન્તીનામનુનયપદૈર્વઞ્ચિતાન્યંશુકાનિ ।
લજ્જાલોલૈરલસવિલસૈરુન્મિષત્પઞ્ચબાણૈ-
ર્ગોપસ્ત્રીણાં નયનકુસુમૈરર્ચિતઃ કેશવો નઃ ॥ ૨.૩॥

માતર્નાતઃપરમનુચિતં યત્ખલાનાં પુરસ્તા-
દસ્તાશઙ્કં જઠરપિઠરીપૂર્તયે નર્તિતાસિ ।
તત્ક્ષન્તવ્યં સહજસરલે વત્સલે વાણિ કુર્યાં
પ્રાયશ્ચિત્તં ગુણગણનયા ગોપવેષસ્ય વિષ્ણોઃ ॥ ૨.૪॥

અઙ્ગુલ્યગ્રૈરરુણકિરણૈર્મુક્તસંરુદ્ધરન્ધ્રં
વારં વારં વદનમરુતા વેણુમાપૂરયન્તમ્ ।
વ્યત્યસ્તાઙ્ઘ્રિં વિકચકમલચ્છાયવિસ્તારનેત્રં
વન્દે વૃન્દાવનસુચરિતં નન્દગોપાલસૂનુમ્ ॥ ૨.૫॥

મન્દં મન્દં મધુરનિનદૈર્વેણુમાપૂરયન્તં
વૃન્દં વૃન્દાવનભુવિ ગવાં ચારયન્તં ચરન્તમ્ ।

છન્દોભાગે શતમખમુખધ્વંસિનાં દાનવાનાં
હન્તારં તં કથય રસને ગોપકન્યાભુજઙ્ગમ્ ॥ ૨.૬॥

વેણીમૂલે વિરચિતઘનશ્યામપિઞ્છાવચૂડો
વિદ્યુલ્લેખાવલયિત ઇવ સ્નિગ્ધપીતામ્બરેણ ।
મામાલિઙ્ગન્મરકતમણિસ્તમ્ભગંભીરબાહુઃ
સ્વપ્ને દૃષ્ટસ્તરુણતુલસીભૂષણો નીલમેઘઃ ॥ ૨.૭॥

કૃષ્ણે હૃત્વા વસનનિચયં કૂલકુઞ્જાધિરૂઢે
મુગ્ધા કાચિન્મુહુરનુનયૈઃ કિં ન્વિતિ વ્યાહરન્તી ।
સભ્રૂભઙ્ગં સદરહસિતં સત્રપં સાનુરાગં
છાયાશૌરેઃ કરતલગતાન્યમ્બરાણ્યાચકર્ષ ॥ ૨.૮॥

અપિ જનુષિ પરસ્મિન્નાત્તપુણ્યો ભવેયં
તટભુવિ યમુનાયાસ્તાદૃશો વંશનાલઃ ।
અનુભવતિ ય એષઃ શ્રીમદાભીરસૂનો-
રધરમણિસમીપન્યાસધન્યામવસ્થામ્ ॥ ૨.૯॥

અયિ પરિચિનુ ચેતઃ પ્રાતરમ્ભોજનેત્રં
કબરકલિતચઞ્ચત્પિઞ્છદામાભિરામમ્ ।
વલભિદુપલનીલં વલ્લવીભાગધેયં
નિખિલનિગમવલ્લીમૂલકન્દં મુકુન્દમ્ ॥ ૨.૧૦।

અયિ મુરલિ મુકુન્દસ્મેરવક્ત્રારવિન્દ-
શ્વસનમધુરસજ્ઞે ત્વાં પ્રણમ્યાદ્ય યાચે ।
અધરમણિસમીપં પ્રાપ્તવત્યાં ભવત્યાં
કથય રહસિ કર્ણે મદ્દશાં નન્દસૂનોઃ ॥ ૨.૧૧।

સજલજલદનીલં વલ્લવીકેલિલોલં
શ્રિતસુરતરુમૂલં વિદ્યુદુલ્લાસિચેલમ્ ।
સુરરિપુકુલકાલં સન્મનોબિમ્બલીલં
નતસુરમુનિજાલં નૌમિ ગોપાલબાલમ્ ॥ ૨.૧૨॥

અધરબિમ્બવિડમ્બિતવિદ્રુમં મધુરવેણુનિનાદવિનોદિનમ્ ।
કમલકોમલકમ્રમુખામ્બુજં કમપિ ગોપકુમારમુપાસ્મહે ॥ ૨.૧૩॥

અધરે વિનિવેશ્ય વંશનાલં વિવરાણ્યસ્ય સલીલમઙ્ગુલીભિઃ ।

મુહુરન્તરયન્મુહુર્વિવર્ણન્ મધુરં ગાયતિ માધવો વનાન્તે ॥ ૨.૧૪॥

વદને નવનીતગન્ધવાહં વચને તસ્કરચાતુરીધુરીણમ્ ।
નયને કુહનાશ્રુમાશ્રયેથાશ્ચરણે કોમલતાણ્ડવં કુમારમ્ ॥ ૨.૧૫॥

અમુનાખિલગોપગોપનાર્થં યમુનારોધસિ નન્દનન્દનેન ।
દમુના વનસમ્ભવઃ પપે નઃ કિમુ નાસૌ શરણાર્થિનાં શરણ્યઃ ॥ ૨.૧૬॥

જગદાદરણીયજારભાવં જલજાપત્યવચોવિચારગમ્યમ્ ।
તનુતાં તનુતાં શિવેતરાણાં સુરનાથોપલસુન્દરં મહો નઃ ॥ ૨.૧૭॥

યા શેખરે શ્રુતિગિરાં હૃદિ યોગભાજાં પાદામ્બુજે ચ સુલભા વ્રજસુન્દરીણામ્ ।
સા કાઽપિ સર્વજગતામભિરામસીમા કામાય નો ભવતુ ગોપકિશોરમૂર્તિઃ ॥ ૨.૧૮॥

અત્યન્તબાલમતસીકુસુમપ્રકાશં દિગ્વાસસં કનકભૂષણભૂષિતાઙ્ગમ્ ।
વિસ્રસ્તકેશમરુણાધરમાયતાક્ષં કૃષ્ણં નમામિ મનસા વસુદેવસૂનુમ્ ॥ ૨.૧૯॥

હસ્તાઙ્ઘ્રિનિક્વણિતકઙ્કણકિઙ્કિણીકં મધ્યે નિતમ્બમવલમ્બિતહેમસૂત્રમ્ ।
મુક્તાકલાપમુકુલીકૃતકાકપક્ષં વન્દામહે વ્રજવરં વસુદેવભાગ્યમ્ ॥ ૨.૨૦॥

વૃન્દાવનદ્રુમતલેષુ ગવાં ગણેષુ વેદાવસાનસમયેષુ ચ દૃશ્યતે યત્ ।
તદ્વેણુનાદનપરં શિખિપિઞ્છચૂડં બ્રહ્મ સ્મરામિ કમલેક્ષણમભ્રનીલમ્ ॥ ૨.૨૧॥

વ્યત્યસ્તપાદમવતંસિતબર્હિબર્હં સાચીકૃતાનનનિવેશિતવેણુરન્ધ્રમ્ ।
તેજઃ પરં પરમકારુણિકં પુરસ્તાત્ પ્રાણપ્રયાણસમયે મમ સન્નિધત્તામ્ ॥ ૨.૨૨॥

ઘોષપ્રઘોષશમનાય મથોગુણેન મધ્યે બબન્ધ જનની નવનીતચોરમ્ ।
તદ્બન્ધનં ત્રિજગતામુદરાશ્રયાણામાક્રોશકારણમહો નિતરાં બભૂવ ॥ ૨.૨૩॥

શૈવા વયં ન ખલુ તત્ર વિચારણીયં પઞ્ચાક્ષરીજપપરા નિતરાં તથાપિ ।
ચેતો મદીયમતસીકુસુમાવભાસં સ્મેરાનનં સ્મરતિ ગોપવધૂકિશોરમ્ ॥ ૨.૨૪॥

રાધા પુનાતુ જગદચ્યુતદત્તચિત્તા મન્થાનમાકલયતી દધિરિક્તપાત્રે ।
તસ્યાઃ સ્તનસ્તબકચઞ્ચલલોલદૃષ્ટિર્દેવોઽપિ દોહનધિયા વૃષભં નિરુન્ધન્ ॥ ૨.૨૫॥

ગોધૂલિધૂસરિતકોમલકુન્તલાગ્રં ગોવર્ધનોદ્ધરણકેલિકૃતપ્રયાસમ્ ।
ગોપીજનસ્ય કુચકુઙ્કુમમુદ્રિતાઙ્ગં ગોવિન્દમિન્દુવદનં શરણં ભજામઃ ॥ ૨.૨૬॥

યદ્રોમરન્ધ્રપરિપૂર્તિવિધાવદક્ષા વારાહજન્મનિ બભૂવુરમી સમુદ્રાઃ ।
તં નામ નાથમરવિન્દદૃશં યશોદા પાણિદ્વયાન્તરજલૈઃ સ્નપયાં બભૂવ ॥ ૨.૨૭॥

વરમિમમુપદેશમાદ્રિયધ્વં નિગમવનેષુ નિતાન્તચારખિન્નઃ ।
વિચિનુત ભવનેષુ વલ્લવીનામુપનિષદર્થમુલૂખલે નિબદ્ધમ્ ॥ ૨.૨૮॥

દેવકીતનયપૂજનપૂતઃ પૂતનારિચરણોદકધૌતઃ ।
યદ્યહં સ્મૃતધનઞ્જયસૂતઃ કિં કરિષ્યતિ સ મે યમદૂતઃ ॥ ૨.૨૯॥

ભાસતાં ભવભયૈકભેષજં માનસે મમ મુહુર્મુહુર્મુહુઃ ।
ગોપવેષમુપસેદુષસ્સ્વયં યાપિ કાપિ રમણીયતા વિભોઃ ॥ ૨.૩૦॥

કર્ણલમ્બિતકદમ્બમઞ્જરી કેસરારુણકપોલમણ્ડલમ્ ।
નિર્મલં નિગમવાગગોચરં નીલિમાનમવલોકયામહે ॥ ૨.૩૧॥

સાચિ સઞ્ચલિતલોચનોત્પલં સામિકુડ્મલિતકોમલાધરમ્ ।
વેગવલ્ગિતકરાઙ્ગુલીમુખં વેણુનાદરસિકં ભજામહે ॥ ૨.૩૨॥

સ્યન્દને ગરુડમણ્ડિતધ્વજે કુણ્ડિનેશતનયાધિરોપિતા ।
કેનચિન્નવતમાલપલ્લવશ્યામલેન પુરુષેણ નીયતે ॥ ૨.૩૩॥

મા યાત પાન્થાઃ પથિ ભીમરથ્યા દિગંબરઃ કોઽપિ તમાલનીલઃ ।
વિન્યસ્તહસ્તોઽપિ નિતમ્બબિમ્બે ધૂર્તસ્સમાકર્ષતિ ચિત્તવિત્તમ્ ॥ ૨.૩૪॥

રાસક્રીડા

અઙ્ગનામઙ્ગનામન્તરે માધવો માધવં માધવં ચાન્તરેણાઙ્ગના ।
ઇત્થમાકલ્પિતે મણ્ડલે મધ્યગઃ સઞ્જગૌ વેણુના દેવકીનન્દનઃ ॥ ૨.૩૫॥

કેકિકેકાદૃતાનેકપઙ્કેરુહાલીનહંસાવલીહૃદ્યતા હૃદ્યતા ।
કંસવંશાટવીદાહદાવાનલઃ સઞ્જગૌ વેણુના દેવકીનન્દનઃ । ૨.૩૬॥

ક્વાપિ વીણાભિરારાવિણા કમ્પિતઃ ક્વાપિ વીણાભિરાકિઙ્કિણીનર્તિતઃ ।
ક્વાપિ વીણાભિરામન્તરં ગાપિતઃ સઞ્જગૌ વેણુના દેવકીનન્દનઃ । ૨.૩૭॥

ચારુચન્દ્રાવલીલોચનૈશ્ચુમ્બિતો ગોપગોવૃન્દગોપાલિકાવલ્લભઃ ।
વલ્લવીવૃન્દવૃન્દારકઃ કામુકઃ સઞ્જગૌ વેણુના દેવકીનન્દનઃ । ૨.૩૮॥

મૌલિમાલામિલન્મત્તભૃઙ્ગીલતાભીતભીતપ્રિયાવિભ્રમાલિઙ્ગિતઃ ।
સ્રસ્તગોપીકુચાભોગસમ્મેલિતઃ સઞ્જગૌ વેણુના દેવકીનન્દનઃ । ૨.૩૯॥

ચારુચામીકરાભાસભામાવિભુર્વૈજયન્તીલતાવાસિતોરઃસ્થલઃ ।
નન્દવૃન્દાવને વાસિતામધ્યગઃ સઞ્જગૌ વેણુના દેવકીનન્દનઃ । ૨.૪૦॥

બાલિકાતાલિકાતાલલીલાલયાસઙ્ગસન્દર્શિતભ્રૂલતાવિભ્રમઃ ।
ગોપિકાગીતદત્તાવધાનસ્સ્વયં સઞ્જગૌ વેણુના દેવકીનન્દનઃ । ૨.૪૧॥

પારિજાતં સમુદ્ધૃત્ય રાધાવરો રોપયામાસ ભામાગૃહસ્યાઙ્ગણે ।
શીતશીતે વટે યામુનીયે તટે સઞ્જગૌ વેણુના દેવકીનન્દનઃ । ૨.૪૨॥

અગ્રે દીર્ઘતરોઽયમર્જુનતરુસ્તસ્યાગ્રતો વર્તનિઃ
સા ઘોષં સમુપૈતિ તત્પરિસરે દેશે કલિન્દાત્મજા ।
તસ્યાસ્તીરતમાલકાનનતલે ચક્રં ગવાં ચારયન્
ગોપઃ ક્રીડતિ દર્શયિષ્યતિ સખે પન્થાનમવ્યાહતમ્ ॥ ૨.૪૩॥

ગોધૂલિધૂસરિતકોમલગોપવેષં ગોપાલબાલકશતૈરનુગમ્યમાનમ્ ।
સાયન્તને પ્રતિગૃહં પશુબન્ધનાર્થં ગચ્છન્તમચ્યુતશિશું પ્રણતોઽસ્મિ નિત્યમ્ ॥ ૨.૪૪॥

નિધિં લાવણ્યાનાં નિખિલજગદાશ્ચર્યનિલયં
નિજાવાસં ભાસાં નિરવધિકનિઃશ્રેયસરસમ્ ।
સુધાધારાસારં સુકૃતપરિપાકં મૃગદૃશાં
પ્રપદ્યે માઙ્ગલ્યં પ્રથમમધિદૈવં કૃતધિયામ્ ॥ ૨.૪૫॥

આતામ્રપાણિકમલપ્રણયપ્રતોદમાલોલહારમણિકુણ્ડલહેમસૂત્રમ્ ।
આવિશ્રમામ્બુકણમમ્બુદનીલમવ્યાદાદ્યં ધનઞ્જયરથાભરણં મહો નઃ ॥ ૨.૪૬॥

નખનિયમિતકણ્ડૂન્ પાણ્ડવસ્યન્દનાશ્વાનનુદિનમભિષિઞ્ચન્નઞ્જલિસ્થૈઃ પયોભિઃ ।
અવતુ વિતતગાત્રસ્તોત્રનિષ્ઠ્યૂતમૌલિર્દશનવિધૃતરશ્મિર્દેવકીપુણ્યરાશિઃ ॥ ૨.૪૭॥

વ્રજયુવતિસહાયે યૌવનોલ્લાસિકાયે સકલશુભવિલાસે કુન્દમન્દારહાસે ।
નિવસતુ મમ ચિત્તં તત્પદાયત્તવૃત્તં મુનિસરસિજભાનૌ નન્દગોપાલસૂનૌ ॥ ૨.૪૮॥

અરણ્યાનીમાર્દ્રસ્મિતમધુરબિમ્બાધરસુધા
સરણ્યા સંક્રાન્તૈસ્સપદિ મદયન્ વેણુનિનદૈઃ ।
ધરણ્યા સાનન્દોત્પુલકમુપગૂઢાઙ્ઘ્રિકમલઃ
શરણ્યાનામાદ્યસ્સ જયતુ શરીરી મધુરિમા ॥ ૨.૪૯॥

વિદગ્ધગોપાલવિલાસિનીનાં સંભોગચિહ્નાઙ્કિતસર્વગાત્રમ્ ।
પવિત્રમામ્નાયગિરામગમ્યં બ્રહ્મ પ્રપદ્યે નવનીતચોરમ્ ॥ ૨.૫૦॥

var De's book. Numbers retained.
મુગ્ધાં સ્નિગ્ધાં મધુરમુરલીમાધુરીધીરનાદૈઃ
કારં કારં કરણવિવશં ગોકુલવ્યાકુલત્વમ્ ।

શ્યામં કામં યુવજનમનોમોહનં મોહનત્વં
ચિત્તે નિત્યં નિવસતુ મહો વલ્લવીવલ્લભં નઃ ॥ ૨.૫૦॥

var

અન્તર્ગૃહે કૃષ્ણમવેક્ષ્ય ચોરં બદ્ધ્વા કવાટં જનનીં ગતૈકા ।
ઉલૂખલે દામનિબદ્ધમેનં તત્રાપિ દૃષ્ટ્વા સ્તિમિતા બભૂવ ॥ ૨.૫૧॥

રત્નસ્થલે જાનુચરઃ કુમારઃ સઙ્ક્રાન્તમાત્મીયમુખારવિન્દમ્ ।
આદાતુકામસ્તદલાભખેદાદ્વિલોક્ય ધાત્રીવદનં રુરોદ ॥ ૨.૫૨॥

આનન્દેન યશોદયા સમદનં ગોપાઙ્ગનાભિશ્ચિરં
સાશઙ્કં બલવિદ્વિષા સકુસુમૈઃ સિદ્ધૈઃ પથિ વ્યાકુલમ્ ।
સેર્ષ્યં ગોપકુમારકૈસ્સકરુણં પૌરૈર્જનૈઃ સસ્મિતં
યો દૃષ્ટઃ સ પુનાતુ નો મુરરિપુઃ પ્રોત્ક્ષિપ્તગોવર્ધનઃ ॥ ૨.૫૩॥

ઉપાસતામાત્મવિદઃ પુરાણાઃ પરં પુમાંસં નિહિતં ગુહાયામ્ ।
વયં યશોદાશિશુબાલલીલાકથાસુધાસિન્ધુષુ લીલયામઃ ॥ ૨.૫૪॥

વિક્રેતુકામા કિલ ગોપકન્યા મુરારિપાદાર્પિતચિત્તવૃત્તિઃ ।
દધ્યાદિકં મોહવશાદવોચદ્ગોવિન્દ દામોદર માધવેતિ ॥ ૨.૫૫॥

ઉલૂખલં વા યમિનાં મનો વા ગોપાઙ્ગનાનાં કુચકુડ્મલં વા ।
મુરારિનામ્નઃ કલભસ્ય નૂનમાલાનમાસીત્ ત્રયમેવ ભૂમૌ ॥ ૨.૫૬॥

કરારવિન્દેન પદારવિન્દં મુખારવિન્દે વિનિવેશયન્તમ્ ।
વટસ્ય પત્રસ્ય પુટે શયાનં બાલં મુકુન્દં મનસા સ્મરામિ ॥ ૨.૫૭॥

શમ્ભો સ્વાગતમાસ્યતામિત ઇતો વામેન પદ્માસન
ક્રૌઞ્ચારે કુશલં સુખં સુરપતે વિત્તેશ નો દૃશ્યસે ।
ઇત્થં સ્વપ્નગતસ્ય કૈટભજિતશ્શ્રુત્વા યશોદા ગિરઃ
કિં કિં બાલક જલ્પસીતિ રચિતં ધૂધૂકૃતં પાતુ નઃ ॥ ૨.૫૮॥

માતઃ કિં યદુનાથ દેહિ ચષકં કિં તેન પાતું પય-
સ્તન્નાસ્ત્યદ્ય કદાસ્તિ વા નિશિ નિશા કા વાઽન્ધકારોદયે ।
આમીલ્યાક્ષિયુગં નિશાપ્યુપગતા દેહીતિ માતુર્મુહુ-
ર્વક્ષોજાંશુકકર્ષણોદ્યતકરઃ કૃષ્ણસ્ય પુષ્ણાતુ નઃ ॥ ૨.૫૯॥

કાલિન્દીપુલિનોદરેષુ મુસલી યાવદ્ગતઃ ખેલિતું

તાવત્કાર્પરિકં પયઃ પિબ હરે વર્ધિષ્યતે તે શિખા ।
ઇત્થં બાલતયા પ્રતારણપરાઃ શ◌ૃત્વા યશોદાગિરઃ
પાયાન્નસ્સ્વશિખાં સ્પૃશન્ પ્રમુદિતઃ ક્ષીરેઽર્ધપીતે હરિઃ ॥ ૨.૬૦॥

કૈલાસે નવનીતતિ ક્ષિતિરિયં પ્રાગ્જગ્ધમૃલ્લોષ્ટતિ
ક્ષીરોદોઽપિ નિપીતદુગ્ધતિ લસત્ સ્મેરે પ્રફુલ્લે મુખે ।
માત્રાઽજીર્ણધિયા દૃઢં ચકિતયા નષ્ટાઽસ્મિ દૃષ્ટાઃ કયા
ધૂધૂ વત્સક જીવ જીવ ચિરમિત્યુક્તોઽવતાન્નો હરિઃ ॥ ૨.૬૧॥

કિઞ્ચિત્કુઞ્ચિતલોચનસ્ય પિબતઃ પર્યાયપીતસ્તનં
સદ્યઃ પ્રસ્નુતદુગ્ધબિન્દુમપરં હસ્તેન સમ્માર્જતઃ ।
માત્રૈકાઙ્ગુલિલાલિતસ્ય ચુબુકે સ્મેરાનનસ્યાધરે
શૌરેઃ ક્ષીણકણાન્વિતા નિપતિતા દન્તદ્યુતિઃ પાતુ નઃ ॥ ૨.૬૨॥

ઉત્તુઙ્ગસ્તનમણ્ડલોપરિલસત્પ્રાલમ્બમુક્તામણે-
રન્તર્બિમ્બિતમિન્દ્રનીલનિકરચ્છાયાનુકારિદ્યુતેઃ ।
લજ્જાવ્યાજમુપેત્ય નમ્રવદના સ્પષ્ટં મુરારેર્વપુઃ
પશ્યન્તી મુદિતા મુદેઽસ્તુ ભવતાં લક્ષ્મીર્વિવાહોત્સવે ॥ ૨.૬૩॥

કૃષ્ણેનામ્બ ગતેન રન્તુમધુના મૃદ્ભક્ષિતા સ્વેચ્છયા
તથ્યં કૃષ્ણ ક એવમાહ મુસલી મિથ્યામ્બ પશ્યાનનમ્ ।
વ્યાદેહીતિ વિદારિતે શિશુમુખે દૃષ્ટ્વા સમસ્તં જગત્
માતા યસ્ય જગામ વિસ્મયપદં પાયાત્ સ નઃ કેશવઃ ॥ ૨.૬૪॥

સ્વાતી સપત્ની કિલ તારકાણાં મુક્તાફલાનાં જનનીતિ રોષાત્ ।
સા રોહિણી નીલમસૂત રત્નં કૃતાસ્પદં ગોપવધૂકુચેષુ ॥ ૨.૬૫॥

નૃત્યન્તમત્યન્તવિલોકનીયં કૃષ્ણં મણિસ્થમ્ભગતં મૃગાક્ષી ।
નિરીક્ષ્ય સાક્ષાદિવ કૃષ્ણમગ્રે દ્વિધા વિતેને નવનીતમેકમ્ ॥ ૨.૬૬॥

વત્સ જાગૃહિ વિભાતમાગતં જીવ કૃષ્ણ શરદાં શતં શતમ્ ।
ઇત્યુદીર્ય સુચિરં યશોદયા દૃશ્યમનવદનં ભજામહે ॥ ૨.૬૭॥

ઓષ્ઠં જિઘ્રન્ શિશુરિતિ ધિયા ચુમ્બિતો વલ્લવીભિઃ
કણ્ઠં ગૃહ્ણન્નરુણિતપદં ગાઢમાલિઙ્ગિતાઙ્ગઃ ।
દોષ્ણા લજ્જાપદમભિમૃશન્નઙ્કમારોપિતાત્મા
ધૂર્તસ્વામી હરતુ દુરિતં દૂરતો બાલકૃષ્ણઃ ॥ ૨.૬૮॥

એતે લક્ષ્મણ જાનકીવિરહિતં માં ખેદયન્ત્યમ્બુદા
મર્માણીવ ચ ઘટ્ટયન્ત્યલમમી ક્રૂરાઃ કદમ્બાનિલાઃ ।
ઇત્થં વ્યહૃતપૂર્વજન્મચરિતં યો રાધયા વીક્ષિતઃ
સેર્ષ્યં શઙ્કિતયા સ નસ્સુખયતુ સ્વપ્નાયમાનો હરિઃ ॥ ૨.૬૯॥

ઓષ્ઠં મુઞ્ચ હરે બિભેમિ ભવતા પાનૈર્હતા પૂતના
કણ્ઠાશ્લેષમમું જહીહિ દલિતાવાલિઙ્ગનેનાર્જુનૌ ।
મા દેહિ છુરિતં હિરણ્યકશિપુર્નીતો નખૈઃ પઞ્ચતા-
મિત્થં વારિતરાત્રિકેલિરવતાલ્લક્ષ્મ્યાપહાસાદ્ધરિઃ ॥ ૨.૭૦॥

રામો નામ બભૂવ હું તદબલા સીતેતિ હું તૌ પિતુ-
ર્વાચા પઞ્ચવટીતટે વિહરતસ્તામાહરદ્રાવણઃ ।
નિદ્રાર્થં જનની કથામિતિ હરેર્હુઙ્કારતઃ શ‍ૃણ્વતઃ
સૌમિત્રે ક્વ ધનુર્ધનુર્ધનુરિતિ વ્યગ્રા ગિરઃ પાતુ નઃ ॥ ૨.૭૧॥

બાલોઽપિ શૈલોદ્ધરણાગ્રપાણિર્નીલોઽપિ નીરન્ધ્રતમઃ પ્રદીપઃ ।
ધીરોઽપિ રાધાનયનાવબદ્ધો જારોઽપિ સંસારહરઃ કુતસ્ત્વમ્ ॥ ૨.૭૨॥

બાલાય નીલવપુષે નવકિઙ્કિણીકજાલાભિરામજઘનાય દિગમ્બરાય ।
શાર્દૂલદિવ્યનખભૂષણભૂષિતાય નન્દાત્મજાય નવનીતમુષે નમસ્તે ॥ ૨.૭૩॥

પાણૌ પાયસભક્તમાહિતરસં બિભ્રન્મુદા દક્ષિણે
સવ્યે શારદચન્દ્રમણ્ડલનિભં હય્યંગવીનં દધત્ ।
કણ્ઠે કલ્પિતપુણ્ડરીકનખમપ્યુદ્દામદીપ્તિં વહન્
દેવો દિવ્યદિગમ્બરો દિશતુ નસ્સૌખ્યં યશોદાશિશુઃ ॥ ૨.૭૪॥

કિઙ્કિણિકિણિકિણિરભસૈરઙ્ગણભુવિ રિઙ્ગણૈઃ સદાઽટન્તમ્ ।
કુઙ્કુણકુણુપદયુગલં કઙ્કણકરભૂષણં હરિં વન્દે ॥ ૨.૭૫॥

સમ્બાધે સુરભીણામમ્બામાયાસયન્તમનુયાન્તીમ્ ।
લમ્બાલકમવલમ્બે તં બાલં તનુવિલગ્નજમ્બાલમ્ ॥ ૨.૭૬॥

અઞ્ચિતપિઞ્છાચૂડં સઞ્ચિતસૌજન્યવલ્લવીવલયમ્ ।
અધરમણિનિહિતવેણું બાલં ગોપાલમનિશમવલમ્બે ॥ ૨.૭૭॥

પ્રહ્લાદભાગધેયં નિગમમહાદ્રેર્ગુહાન્તરાધેયમ્ ।
નરહરિપદાભિધેયં વિબુધવિધેયં મમાનુસંધેયમ્ ॥ ૨.૭૮॥

સંસારે કિં સારં કંસારેશ્ચરણકમલપરિવસનમ્ ।

જ્યોતિઃ કિમન્ધકારે યદન્ધકારેઽનુસ્મરણમ્ ॥ ૨.૭૯॥

કલશનવનીતચોરે કમલાદૃક્કુમુદચન્દ્રિકાપૂરે ।
વિહરતુ નન્દકુમારે ચેતો મમ ગોપસુન્દરીજારે ॥ ૨.૮૦॥

કસ્ત્વં બાલ બલાનુજઃ કિમિહ તે મન્મન્દિરાશઙ્કયા
યુક્તં તન્નવનીતપાત્રવિવરે હસ્તં કિમર્થં ન્યસેઃ ।
માતઃ કઞ્ચન વત્સકં મૃગયિતું મા ગા વિષાદં ક્ષણા-
દિત્યેવં વરવલ્લવીપ્રતિવચઃ કૃષ્ણસ્ય પુષ્ણાતુ નઃ ॥ ૨.૮૧॥

ગોપાલાજિરકર્દમે વિહરસે વિપ્રાધ્વરે લજ્જસે
બ્રૂષે ગોકુલહુઙ્કૃતૈઃ સ્તુતિશતૈર્મૌનં વિધત્સે વિદામ્ ।
દાસ્યં ગોકુલપુંશ્ચલીષુ કુરુષે સ્વામ્યં ન દાન્તાત્મસુ
જ્ઞાતં કૃષ્ણ તવાઙ્ઘ્રિપઙ્કજયુગં પ્રેમણાચલં મઞ્જુલમ્ ॥ ૨.૮૨॥

નમસ્તસ્મૈ યશોદાયા દાયાદાયાસ્તુ તેજસે ।
યદ્ધિ રાધામુખામ્ભોજં ભોજં ભોજં વ્યવર્ધત ॥ ૨.૮૩॥

અવતારાઃ સન્ત્વન્યે સરસિજનયનસ્ય સર્વતોભદ્રાઃ ।
કૃષ્ણાદન્યઃ કો વા પ્રભવતિ ગોગોપગોપિકામુક્ત્યૈ ॥ ૨.૮૪॥

મધ્યે ગોકુલમણ્ડલં પ્રતિદિશં ચામ્બારવોજ્જૃમ્ભિતે
પ્રાતર્દોહમહોત્સવે નવઘનશ્યામં રણન્નૂપુરમ્ ।
ફાલે બાલવિભૂષણં કટિરણત્સત્કિઙ્કિણીમેખલં
કણ્ઠે વ્યાઘ્રનખં ચ શૈશવકલાકલ્યાણકાર્ત્સ્ન્યં ભજે ॥ ૨.૮૫॥

સજલજલદનીલં દર્શિતોદારલીલં
કરતલધૃતશૈલં વેણુનાદૈ રસાલમ્ ।
વ્રજજનકુલપાલં કામિનીકેલિલોલં
કલિતલલિતમાલં નૌમિ ગોપાલબાલમ્ ॥ ૨.૮૬॥

સ્મિતલલિતકપોલં સ્નિગ્ધસઙ્ગીતલોલં
લલિતચિકુરજાલં ચૌર્યચાતુર્યલીલમ્ ।
શતમખરિપુકાલં શાતકુમ્ભાભચેલં
કુવલયદલનીલં નૌમિ ગોપાલબાલમ્ ॥ ૨.૮૭॥

મુરલિનિનદલોલં મુગ્ધમાયૂરચૂડં
દલિતદનુજજાલં ધન્યસૌજન્યલીલમ્ ।

પરહિતનવહેલં પદ્મસદ્માનુકૂલં
નવજલધરનીલં નૌમિ ગોપાલબાલમ્ ॥ ૨.૮૮॥

સરસગુણનિકાયં સચ્ચિદાનન્દકાયં
શમિતસકલમાયં સત્યલક્ષ્મીસહાયમ્ ।
શમદમસમુદાયં શાન્તસર્વાન્તરાયં
સુહૃદયજનદાયં નૌમિ ગોપાલબાલમ્ ॥ ૨.૮૯॥

લક્ષ્મીકલત્રં લલિતાબ્જનેત્રં પૂર્ણેન્દુવક્ત્રં પુરુહૂતમિત્રમ્ ।
કારુણ્યપાત્રં કમનીયગાત્રં વન્દે પવિત્રં વસુદેવપુત્રમ્ ॥ ૨.૯૦॥

મદમયમદમયદુરગં યમુનામવતીર્ય વીર્યશાલી યઃ ।
મમ રતિમમરતિરસ્કૃતિશમનપરસ્સ ક્રિયાત્ કૃષ્ણઃ ॥ ૨.૯૧॥

મૌલૌ માયૂરબર્હં મૃગમદતિલકં ચારુ લાલાટપટ્ટે
કર્ણદ્વન્દ્વે ચ તાલીદલમતિમૃદુલં મૌક્તિકં નાસિકાયામ્ ।
હારો મન્દારમાલાપરિમલભરિતે કૌસ્તુભસ્યોપકણ્ઠે
પાણૌ વેણુશ્ચ યસ્ય વ્રજયુવતિયુતઃ પાતુ પીતામ્બરો નઃ ॥ ૨.૯૨॥

મુરારિણા વારિવિહારકાલે મૃગેક્ષણાનાં મુષિતાંશુકાનામ્ ।
કરદ્વયં વા કચસંહતિર્વા પ્રમીલનં વા પરિધાનમાસીત્ ॥ ૨.૯૩॥

યાસાં ગોપાઙ્ગનાનાં લસદસિતતરાલોલલીલાકટાક્ષા
યન્નાસા ચારુ મુક્તામણિરુચિનિકરવ્યોમગઙ્ગાપ્રવાહે ।
મીનાયન્તેઽપિ તાસામતિરભસચલચ્ચારુનીલાલકાન્તા
ભૃઙ્ગાયન્તે યદઙ્ઘ્રિદ્વયસરસિરુહે પાતુ પીતામ્બરો નઃ ॥ ૨.૯૪॥

યદ્વેણુશ્રેણિરૂપસ્થિતસુષિરમુખોદ્ગીર્ણનાદપ્રભિન્ના
એણાક્ષ્યસ્તત્ક્ષણેન ત્રુટિતનિજપતિપ્રેમબન્ધા બભૂવુઃ ॥

અસ્તવ્યસ્તાલકાન્તાઃ સ્ફુરદધરકુચદ્વન્દ્વનાભિપ્રદેશાઃ
કામાવેશપ્રકર્ષપ્રકટિતપુલકાઃ પાતુ પીતમ્બરો નઃ ॥ ૨.૯૫॥

દેવક્યા જઠરાકરે સમુદિતઃ ક્રીતો ગવાં પાલિના
નન્દેનાનકદુન્દુભેર્નિજસુતાપણ્યેન પુણ્યાત્મના ।
ગોપાલાવલિમુગ્ધહારતરલો ગોપીજનાલઙ્કૃતિઃ
સ્થેયાન્નો હૃદિ સન્તતં સુમધુરઃ કોઽપીન્દ્રનીલો મણિઃ ॥ ૨.૯૬॥

પીઠે પીઠનિષણ્ણબાલકગલે તિષ્ઠન્ સ ગોપાલકો

યન્ત્રાન્તઃસ્થિતદુગ્ધભાણ્ડમપકૃષ્યાચ્છાદ્ય ઘણ્ટારવમ્ ।
વક્ત્રોપાન્તકૃતાઞ્જલિઃ કૃતશિરઃકમ્પં પિબન્ યઃ પયઃ
પાયાદાગતગોપિકાનયનયોર્ગણ્ડૂષફૂત્કારકૃત્ ॥ ૨.૯૭॥

યજ્ઞૈરીજિમહે ધનં દદિમહે પાત્રેષુ નૂનં વયં
વૃદ્ધાન્ ભેજિમહે તપશ્ચકૃમહે જન્માન્તરે દુશ્ચરમ્ ।
યેનાસ્માકમભૂદનન્યસુલભા ભક્તિર્ભવદ્વેષિણી
ચાણૂરદ્વિષિ ભક્તકલ્મષમુષિ શ્રેયઃપુષિ શ્રીજુષિ ॥ ૨.૯૮॥

ત્વયિ પ્રસન્ને મમ કિં ગુણેન ત્વય્યપ્રસન્ને મમ કિં ગુણેન ।
રક્તે વિરક્તે ચ વરે વધૂનાં નિરર્થકઃ કુઙ્કુમપત્રભઙ્ગઃ ॥ ૨.૯૯॥

ગાયન્તિ ક્ષણદાવસાનસમયે સાનન્દમિન્દુપ્રભા
રુન્ધન્ત્યો નિજદન્તકાન્તિનિવહૈર્ગોપાઙ્ગના ગોકુલે ।
મથ્નન્ત્યો દધિ પાણિકઙ્કણઝણત્કારાનુકારં જવાદ્
વ્યાવલ્ગદ્વસનાઞ્જલા યમનિશં પીતામ્બરોઽવ્યાત્સ નઃ ॥ ૨.૧૦૦॥

અંસાલમ્બિતવામકુણ્ડલભરં મન્દોન્નતભ્રૂલતં
કિઞ્ચિત્કુઞ્ચિતકોમલાધરપુટં સાચિ પ્રસારેક્ષણમ્ ।
આલોલાઙ્ગુલિપલ્લવૈર્મુરલિકામાપૂરયન્તં મુદા
મૂલે કલ્પતરોસ્ત્રિભઙ્ગિલલિતં જાને જગન્મોહનમ્ ॥ ૨.૧૦૧॥

મલ્લૈશ્શૈલેન્દ્રકલ્પઃ શિશુરિતજનૈઃ પુષ્પચાપોઽઙ્ગનાભિ-
ર્ગોપૈસ્તુ પ્રાકૃતાત્મા દિવિ કુલિશભૃતા વિશ્વકાયોઽપ્રમેયઃ ।
ક્રુદ્ધઃ કંસેન કાલો ભયચકિતદૃશા યોગિભિર્ધ્યેયમૂર્તિઃ
દૃષ્ટો રઙ્ગાવતારે હરિરમરગણાનન્દકૃત્ પાતુ યુષ્માન્ ॥ ૨.૧૦૨॥

સંવિષ્ટો મણિવિષ્ટરેઽઙ્કતલમધ્યાસીનલક્ષ્મીમુખે
કસ્તૂરીતિલકં મુદા વિરચયન્ હર્ષાત્કુચૌ સંસ્પૃશન્ ।
અન્યોન્યસ્મિતચન્દ્રિકાકિસલયૈરારાધયન્મન્મથં
ગોપીગોપપરીવૃતો યદુપતિઃ પાયાજ્જગન્મોહનઃ ॥ ૨.૧૦૩॥

આકૃષ્ટે વસનાઞ્ચલે કુવલયશ્યામા ત્રપાધઃકૃતા
દૃષ્ટિઃ સંવલિતા રુચા કુચયુગે સ્વર્ણપ્રભે શ્રીમતિ ।
બાલઃ કશ્ચન ચૂતપલ્લવ ઇતિ પ્રાન્તસ્મિતાસ્યશ્રિયં
શ્લિષ્યંસ્તામથ રુક્મિણીં નતમુખીં કૃષ્ણસ્સ પુષ્ણાતુ નઃ ॥ ૨.૧૦૪॥

ઉર્વ્યાં કોऽપિ મહીધરો લઘુતરો દોર્ભ્યાં ધૃતો લીલયા
તેન ત્વં દિવિ ભૂતલે ચ સતતં ગોવર્ધનોદ્ધારકઃ ।
ત્વાં ત્રૈલોક્યધરં વહામિ કુચયોરગ્રે ન તદ્ગણ્યતે
કિં વા કેશવ ભાષણેન બહુના પુણ્યૈર્યશો લભ્યતે ॥ ૨.૧૦૫॥

સન્ધ્યાવન્દન ભદ્રમસ્તુ ભવતો ભોઃ સ્નાન તુભ્યં નમો
ભો દેવાઃ પિતરશ્ચ તર્પણવિધૌ નાહં ક્ષમઃ ક્ષમ્યતામ્ ।
યત્ર ક્વાપિ નિષીદ્ય યાદવકુલોત્તંસસ્ય કંસદ્વિષઃ
સ્મારં સ્મારમઘં હરામિ તદલં મન્યે કિમન્યેન મે ॥ ૨.૧૦૬॥

હે ગોપાલક હે કૃપાજલનિધે હે સિન્ધુકન્યાપતે
હે કંસાન્તક હે ગજેન્દ્રકરુણાપારીણ હે માધવ ।
હે રામાનુજ હે જગત્ત્રયગુરો હે પુણ્ડરીકાક્ષ માં
હે ગોપીજનનાથ પાલય પરં જાનામિ ન ત્વાં વિના ॥ ૨.૧૦૭॥

કસ્તૂરીતિલકં લલાટફલકે વક્ષઃસ્થલે કૌસ્તુભં
નાસાગ્રે નવમૌક્તિકં કરતલે વેણું કરે કઙ્કણમ્ ।
સર્વાઙ્ગે હરિચન્દનં ચ કલયન્ કણ્ઠે ચ મુક્તાવલિં
ગોપસ્ત્રીપરિવેષ્ટિતો વિજયતે ગોપાલચૂડામણિઃ ॥ ૨.૧૦૮॥

લોકાનુન્મદયન્ શ્રુતીર્મુખરયન્ શ્રોણીરુહાન્હર્ષયન્
શૈલાન્વિદ્રવયન્ મૃગાન્વિવશયન્ ગોવૃન્દમાનન્દયન્ ।
ગોપાન્ સંભ્રમયન્ મુનીન્મુકુલયન્ સપ્તસ્વરાન્ જૃમ્ભયન્
ઓંકારાર્થમુદીરયન્ વિજયતે વંશીનિનાદશ્શિશોઃ ॥ ૨.૧૦૯॥

॥ ઇતિ શ્રીકૃષ્ણકર્ણામૃતે દ્વિતીયાશ્વાસઃ સમાપ્તઃ ॥

## ॥ તૃતીયાશ્વાસઃ ॥

અસ્તિ સ્વસ્ત્યયનં સમસ્તજગતામભ્યસ્તલક્ષ્મીસ્તનં
વસ્તુ ધ્વસ્તરજસ્તમોભિરનિશં ન્યસ્તં પુરસ્તાદિવ ।
હસ્તોદસ્તગિરીન્દ્રમસ્તકતરુપ્રસ્તારવિસ્તારિત-
સ્રસ્તસ્વસ્તરુસૂનસંસ્તરલસત્પ્રસ્તાવિ રાધાસ્તુતમ્ ॥ ૩.૧॥

રાધારાધિતવિભ્રમાદ્ભુતરસં લાવણ્યરત્નાકરં
સાધારણ્યપદવ્યતીતસહજસ્મેરાનનામ્ભોરુહમ્ ।
આલમ્બે હરિનીલગર્વગુરુતાસર્વસ્વનિર્વાપણં
બાલં વૈણવિકં વિમુગ્ધમધુરં મૂર્ધાભિષિક્તં મહઃ ॥ ૩.૨॥

કરિણામલભ્યગતિવૈભવં ભજે કરુણાવલમ્બિતકિશોરવિગ્રહમ્ ।
યમિનામનારતવિહારિ માનસે યમુનાવનાન્તરસિકં પરં મહઃ ॥ ૩.૩॥

અતન્દ્રિતત્રિજગદપિ વ્રજાઙ્ગનાનિયન્ત્રિતં વિપુલવિલોચનાજ્ઞયા ।
નિરન્તરં મમ હૃદયે વિજૃમ્ભતાં સમન્તતઃ સરસતરં પરં મહઃ ॥ ૩.૪॥

કન્દર્પપ્રતિમલ્લકાન્તિવિભવં કાદમ્બિનીબાન્ધવં
વૃન્દારણ્યવિલાસિનીવ્યસનિનં વેષેણ ભૂષામયમ્ ।
મન્દસ્મેરમુખામ્બુજં મધુરિમવ્યામૃષ્ટબિમ્બાધરં
વન્દે કન્દલિતાર્દ્રયૌવનવનં કૈશોરકં શાર્ઙ્ગિણઃ ॥ ૩.૫॥

આમુક્તમાનુષમમુક્તનિજાનુભાવ-
મારૂઢયૌવનમગૂઢવિદગ્ધલીલમ્ ।
આમૃષ્ટયૌવનમનષ્ટકિશોરભાવ-
માદ્યં મહઃ કિમપિ માદ્યતિ માનસે મે ॥ ૩.૬॥

તે તે ભાવાસ્સકલજગદીલોભનીયપ્રભાવાઃ
નાનાતૃષ્ણાસુહૃદિ હૃદિ મે કામમાવિર્ભવન્તુ ।
વીણાવેણુક્વણિતલસિતસ્મેરવક્ત્રારવિન્દા-
ન્નાહં જાને મધુરમપરં નન્દપુણ્યામ્બુરાશેઃ ॥ ૩.૭॥

સુકૃતિભિરાદૃતે સરસવેણુનિનાદસુધા-
રસલહરીવિહારનિરવગ્રહકર્ણપુટે ।
વ્રજવરસુન્દરીમુખસરોરુહસારસિકે
મહસિ કદા નુ મજ્જતિ મદીયમિદં હૃદયમ્ ॥ ૩.૮॥

તૃષ્ણાતુરે ચેતસિ જૃમ્ભમાણં મુષ્ણન્મુહુર્મોહમહાન્ધકારમ્ ।
પુષ્ણાતુ નઃ પુણ્યદયૈકસિન્ધોઃ કૃષ્ણસ્ય કારુણ્યકટાક્ષકેલિઃ ॥ ૩.૯॥

નિખિલાગમમૌલિલાલિતં પદકમલં પરમસ્ય તેજસઃ ।
વ્રજભુવિ બહુમન્મહેતરાં સરસકરીષવિશેષરૂષિતમ્ ॥ ૩.૧૦॥

ઉદારમૃદુલસ્મિતવ્યતિકરાભિરામાનનં
મુદા મુહુરુદીર્ણયા મુનિમનોઽમ્બુજામ્રેડિતમ્ ।
મદાલસવિલોચનવ્રજવધૂમુખાસ્વાદિતં
કદા નુ કમલેક્ષણં કમપિ બાલમાલોકયે ॥ ૩.૧૧॥

વ્રજજનમદયોષિલ્લોચનોચ્છિષ્ટશેષી-
કૃતમતિચપલાભ્યાં લોચનાભ્યામુભાભ્યામ્ ।
સકૃદપિ પરિપાતું તે વયં પારયામઃ
કુવલયદલનીલં કાન્તિપૂરં કદા નુ ॥ ૩.૧૨॥

ઘોષયોષિદનુગીતયૌવનં કોમલસ્તનિતવેણુનિસ્સ્વનમ્ ।
સારભૂતમભિરામસમ્પદાં ધામ તામરસલોચનં ભજે ॥ ૩.૧૩॥

લીલયા લલિતયાવલમ્બિતં મૂલગેહમિવ મૂર્તિસમ્પદામ્ ।
નીલનીરદવિકાસવિભ્રમં બાલમેવ વયમાદ્રિયામહે ॥ ૩.૧૪॥

વન્દે મુરારેશ્ચરણારવિન્દદ્વન્દ્વં દયાદર્શિતશૈશવસ્ય ।
વન્દારુવૃન્દારકવૃન્દમૌલિમન્દારમાલાવિનિમર્દભીરુ ॥ ૩.૧૫॥

યસ્મિન્ નૃત્યતિ યસ્ય શેખરભરૈઃ ક્રૌઞ્ચદ્વિષશ્ચન્દ્રકી
યસ્મિન્ દૃપ્યતિ યસ્ય ઘોષસુરભિં જિઘ્રન્ વૃષો ધૂર્જટેઃ ।
યસ્મિન્ સજ્જતિ યસ્ય વિભ્રમગતિં વાઞ્છન્ હરેસ્સિન્ધુર-
સ્તદ્વૃન્દાવનકલ્પકદ્રુમવનં તં વા કિશોરં ભજે ॥ ૩.૧૬॥

અરુણાધરામૃતવિશેષિતસ્મિતં વરુણાલયાનુગતવર્ણવૈભવમ્ ।
તરુણારવિન્દદલદીર્ઘલોચનં કરુણામયં કમપિ બાલમાશ્રયે ॥ ૩.૧૭॥

લાવણ્યવીચીરચિતાઙ્ગભૂષાં ભૂષાપદારોપિતપુણ્યબર્હામ્ ।
કારુણ્યધારાલકટાક્ષમાલાં બાલાં ભજે વલ્લવવંશલક્ષ્મીમ્ ॥ ૩.૧૮।

મધુરૈકરસં વપુર્વિભોર્મથુરાવીથિચરં ભજામહે ।
નગરીમૃગશાબલોચનાનાં નયનેન્દીવરવર્ષવર્ષિતમ્ ॥ ૩.૧૯॥

પર્યાકુલેન નયનાન્તવિજૃમ્ભિતેન વક્ત્રેણ કોમલદરસ્મિતવિભ્રમેણ ।
મન્દ્રેણ મઞ્જુલતરેણ ચ જલ્પિતેન નન્દસ્ય હન્ત તનયો હૃદયં ધુનોતિ ॥ ૩.૨૦॥

કન્દર્પકણ્ડૂલકટાક્ષવન્દીરિન્દીવરાક્ષીરભિલાષમાણાન્ ।
મન્દસ્મિતાધારમુખારવિન્દાન્ વન્દામહે વલ્લવધૂર્તપાદાન્ ॥ ૩.૨૧।

લીલાટોપકટાક્ષનિર્ભરપરિષ્વઙ્ગપ્રસઙ્ગાધિક-
પ્રીતે ગીતિવિભઙ્ગસઙ્ગરલસદ્વેણુપ્રણાદામૃતે ।
રાધાલોચનલાલિતસ્ય લલિતસ્મેરે મુરારેર્મુદા
માધુર્યૈકરસે મુખેન્દુકમલે મગ્નં મદીયં મનઃ ॥ ૩.૨૨॥

શરણાગતવ્રજપઞ્જરે શરણે શાર્ઙ્ગધરસ્ય વૈભવે ।
કૃપયા ધૃતગોપવિગ્રહે કિયદન્યન્મૃગયામહે વયમ્ ॥ ૩.૨૩॥

જગત્રયૈકાન્તમનોજ્ઞભૂમિચેતસ્યજસ્રં મમ સન્નિધત્તામ્ ।
રામાસમાસ્વાદિતસૌકુમાર્યં રાધાસ્તનાભોગરસજ્ઞમોજઃ ॥ ૩.૨૪॥

વયમેતે વિશ્વસિમઃ કરુણાકર કૃષ્ણ કિંવદન્તીમ્ ।
અપિ ચ વિભો તવ લલિતે ચપલતરા મતિરિયં બાલ્યે ॥ ૩.૨૫॥

વત્સપાલચરઃ કોઽપિ વત્સઃ શ્રીવત્સલાઞ્છનઃ ।
ઉત્સવાય કદા ભાવીત્યુત્સુકે મમ લોચને ॥ ૩.૨૬॥

મધુરિમભરિતે મનોભિરામે મૃદુલતરસ્મિતમુદ્રિતાનનેન્દૌ ।
ત્રિભુવનનયનૈકલોભનીયે મહસિ વયં વ્રજભાજિ લાલસાઃ સ્મઃ ॥ ૩.૨૭॥

મુખારવિન્દે મકરન્દબિન્દુનિષ્યન્દલીલામુરલીનિનાદે ।
વ્રજાઙ્ગનાપાઙ્ગતરઙ્ગભૃઙ્ગસંગ્રામભૂમૌ તવ લાલસાઃ સ્મઃ ॥ ૩.૨૮॥

આતામ્રાયતલોચનાંશુલહરીલીલાસુધાપ્યાયિતૈઃ
ગીતામ્રેડિતદિવ્યકેલિભરિતૈઃ સ્ફીતં વ્રજસ્ત્રીજનૈઃ ।
સ્વેદામ્ભઃકણભૂષિતેન કિમપિ સ્મેરેણ વક્ત્રેન્દુના
પાદામ્ભોજમૃદુપ્રચારસુભગં પશ્યામિ દૃશ્યં મહઃ ॥ ૩.૨૯॥

પાણૌ વેણુઃ પ્રકૃતિસુકુમારાકૃતૌ બાલ્યલક્ષ્મીઃ
પાર્શ્વે બાલાઃ પ્રણયસરસાલોકિતાપાઙ્ગલીલાઃ ।
મૌલૌ બર્હં મધુરવદનામ્ભોરુહે મૌગ્ધ્યમુદ્રે-
ત્યાર્દ્રાકારં કિમપિ કિતવં જ્યોતિરન્વેષયામઃ ॥ ૩.૩૦॥

આરૂઢવેણુતરુણાધરવિભ્રમેણ માધુર્યશાલિવદનામ્બુજમુદ્વહન્તી ।
આલોક્યતાં કિમનયા વનદેવતા વઃ કૈશોરકે વયસિ કાપિ ચ કાન્તિયષ્ટિઃ ॥ ૩.૩૧॥

અનન્યસાધારણકાન્તિકાન્તમાક્રાન્તગોપીનયનારવિન્દમ્ ।
પુંસઃ પુરાણસ્ય નવં વિલાસં પુણ્યેન પૂર્ણેન વિલોકયિષ્યે ॥ ૩.૩૨॥

સાષ્ટાઙ્ગપાતમભિવન્દ્ય સમસ્તભાવૈઃ સર્વાન્ સુરેન્દ્રનિકરાનિદમેવ યાચે ।
મન્દસ્મિતાર્દ્રમધુરાનનચન્દ્રબિમ્બે નન્દસ્ય પુણ્યનિચયે મમ ભક્તિરસ્તુ ॥ ૩.૩૩॥

એષુ પ્રવાહેષુ સ એવ મન્યે ક્ષણોઽપિ ગણ્યઃ પુરુષાયુષેષુ ।
આસ્વાદ્યતે યત્ર કયાપિ ભક્ત્યા નીલસ્ય બાલસ્ય નિજં ચરિત્રમ્ ॥ ૩.૩૪॥

નિસર્ગસરસાધરં નિજદયાર્દ્રદિવ્યેક્ષણં
મનોજ્ઞમુખપઙ્કજં મધુરસાર્દ્રમન્દસ્મિતમ્ ।
રસજ્ઞહૃદયાસ્પદં રમિતવલ્લવીલોચનં
પુનઃપુનરુપાસ્મહે ભુવનલોભનીયં મહઃ ॥ ૩.૩૫॥

સ કોઽપિ બાલસ્સરસીરુહાક્ષઃ સા ચ વ્રજસ્ત્રીજનપાદધૂલિઃ ।
મુહુસ્તદેતદ્યુગલં મદીયે મોમુહ્યમાનોઽપિ મનસ્યુદેતુ ॥ ૩.૩૬॥

મયિ પ્રયાણાભિમુખે ચ વલ્લવીસ્તનદ્વયીદુર્લલિતસ્સ બાલકઃ ।
શનૈશ્શનૈઃ શ્રાવિતવેણુનિસ્વનો વિલાસવેષેણ પુરઃ પ્રતીયતામ્ ॥ ૩.૩૭॥

અતિભૂમિમભૂમિમેવ વા વચસાં વાસિતવલ્લવીસ્તનમ્ ।
મનસામપરં રસાયનં મધુરાદ્વૈતમુપાસ્મહે મહઃ ॥ ૩.૩૮॥

જનનાન્તરેઽપિ જગદેકમણ્ડને કમનીયધામ્નિ કમલાયતેક્ષણે ।
વ્રજસુન્દરીજનવિલોચનામૃતે ચપલાનિ સન્તુ સકલેન્દ્રિયાણિ મે ॥ ૩.૩૯॥

મુનિશ્રેણીવન્દ્યં મદભરલસદ્વલ્લવવધૂ-
સ્તનશ્રોણીબિમ્બસ્તિમિતનયનામ્ભોજસુભગમ્ ।
પુનઃ શ્લાઘાભૂમિં પુલકિતગિરાં નૈગમગિરાં
ઘનશ્યામં વન્દે કિમપિ કમનીયાકૃતિ મહઃ ॥ ૩.૪૦॥

અનુચુમ્બતામવિચલેન ચેતસા મનુજાકૃતેર્મધુરિમશ્રિયં વિભોઃ ।
અયિ દેવ કૃષ્ણ દયિતેતિ જલ્પતામપિ નો ભવેયુરપિ નામ તાદૃશઃ ॥ ૩.૪૧॥

કિશોરવેષેણ કૃશોદરીદૃશાં વિશેષદૃશ્યેન વિશાલલોચનમ્ ।
યશોદયા લબ્ધયશોનવામ્બુધેર્નિશામયે નીલનિશાકરં કદા ॥ ૩.૪૨॥

પ્રકૃતિરવતુ નો વિલાસલક્ષ્મ્યાઃ પ્રકૃતિજડં પ્રણતાપરાધવીથ્યામ્ ।
સુકૃતિકૃતપદં કિશોરભાવે સુકૃતિમનઃ પ્રણિધાનપાત્રમોજઃ ॥ ૩.૪૩॥

અપહસિતસુધામદાવલેપૈરતિસુમનોહરમાર્દ્રમન્દહાસૈઃ ।
વ્રજયુવતિવિલોચનાવલેહ્યં રમયતુ ધામ રમાવરોધનં નઃ ॥ ૩.૪૪॥

અઙ્કુરિતસ્મેરદશાવિશેષૈરશ્રાન્તહર્ષામૃતવર્ષમક્ષ્ણામ્ ।
સંક્રીડતાં ચેતસિ ગોપકન્યાઘનસ્તનસ્વસ્ત્યયનં મહો નઃ ॥ ૩.૪૫॥

મૃગમદપઙ્કસઙ્કરવિશેષિતવન્યમહા-
ગિરિતટગણ્ડગૈરિકઘનદ્રવવિદ્રુમિતમ્ ।
અજિતભુજાન્તરં ભજત હે વ્રજગોપવધૂ-
સ્તનકલશસ્થલીઘુસૃણમર્દનકર્દમિતમ્ ॥ ૩.૪૬॥

આમૂલપલ્લવિતલીલમપાઙ્ગજાલૈરાસિઞ્ચતી ભુવનમાદૃતગોપવેષા ।
બાલાકૃતિર્મૃદુલમુગ્ધમુખેન્દુબિમ્બા માધુર્યસિદ્ધિરવતાન્મધુવિદ્વિષો નઃ ॥ ૩.૪૭॥

વિરણન્ મણિનૂપુરં વ્રજે ચરણામ્ભોજમુપાસ્સ્વ શાર્ઙ્ગિણઃ ।
સરસે સરસિ શ્રિયાશ્રિતં કમલં વા કલહંસનાદિતમ્ ॥ ૩.૪૮॥

શરણમશરણાનાં શારદામ્ભોજનેત્રં
નિરવધિમધુરિમ્ણા નીલવેષેણ રમ્યમ્ ।
સ્મરશરપરતન્ત્રસ્મેરનેત્રામ્બુજાભિ-
ર્વ્રજયુવતિભિરવ્યાદ્ બ્રહ્મ સંવેષ્ટિતં નઃ ॥ ૩.૪૯॥

સુવ્યક્તકાન્તિભરસૌરભદિવ્યગાત્ર-
મવ્યક્તયૌવનપરીતકિશોરભાવમ્ ।
ગવ્યાનુપાલનવિધાવનુશિષ્ટમવ્યા-
દવ્યાજરમ્યમખિલેશ્વરવૈભવં નઃ ॥ ૩.૫૦॥

અનુગતમમરીણામમ્બરાલમ્બિનીનાં
નયનમધુરિમશ્રીનર્મનિર્માણસીમ્નામ્ ।
વ્રજયુવતિવિલાસવ્યાપૃતાપાઙ્ગમવ્યાત્
ત્રિભુવનસુકુમારં દેવકૈશોરકં નઃ ॥ ૩.૫૧॥

આપાદમાચૂડમતિપ્રસક્તૈરાપીયમાના યમિનાં મનોભિઃ ।
ગોપીજનજ્ઞાતરસાઽવતાન્નો ગોપલભૂપાલકુમારમૂર્તિઃ ॥ ૩.૫૨॥

દિષ્ટ્યા વૃન્દાવનમૃગદૃશાં વિપ્રયોગાકુલાનાં
પ્રત્યાસન્નં પ્રણયચપલાપાઙ્ગવીચીતરઙ્ગૈઃ ।
લક્ષ્મીલીલાકુવલયદલશ્યામલં ધામ કામાન્
પુષ્ણીયાન્નઃ પુલકમુકુલાભોગભૂષાવિશેષમ્ ॥ ૩.૫૩॥

જયતિ ગુહશિખીન્દ્રપિઞ્છમૌલિઃ સુરગિરિગૈરિકકલ્પિતાઙ્ગરાગઃ ।

સુરયુવતિવિકીર્ણસૂનવર્ષસ્નપિતવિભૂષિતકુન્તલઃ કુમારઃ ॥ ૩.૫૪॥

મધુરમન્દશુચિસ્મિતમઞ્જુલં વદનપઙ્કજમઙ્ગજવેલ્લિતમ્ ।
વિજયતાં વ્રજબાલવધૂજનસ્તનતટીવિલુઠન્નયનં વિભોઃ ॥ ૩.૫૫॥

અલસવિલસન્મુગ્ધસ્નિગ્ધસ્મિતં વ્રજસુન્દરી-
મદનકદનસ્વિન્નં ધન્યં મહદ્વદનામ્બુજમ્ ।
તરુણમરુણજ્યોત્સ્નાકાત્સ્ન્ર્યા સ્મિતસ્નપિતાધરં
જયતિ વિજયશ્રેણીમેણીદૃશાં મદયન્મહઃ ॥ ૩.૫૬॥

રાધાકેલિકટાક્ષવીક્ષિતમહાવક્ષઃસ્થલીમણ્ડના
જીયાસુઃ પુલકાઙ્કુરાસ્ત્રિભુવનાસ્વાદીયસસ્તેજસઃ ।
ક્રીડાન્તપ્રતિસુપ્તદુગ્ધતનયામુગ્ધાવબોધક્ષણ-
ત્રાસારૂઢદૃઢોપગૂહનમહાસામ્રાજ્યસાન્દ્રશ્રિયઃ ॥ ૩.૫૭॥

સ્મિતસ્નુતસુધાધરા મદશિખણ્ડિબર્હાઙ્કિતા
વિશાલનયનામ્બુજા વ્રજવિલાસિનીવાસિતાઃ ।
મનોજ્ઞમુખપઙ્કજા મધુરવેણુનાદદ્રવા
જયન્તિ મમ ચેતસશ્ચિરમુપાસિતા વાસનાઃ ॥ ૩.૫૮॥

જીયાદસૌ શિખિશિખણ્ડકૃતાવતંસા
સાંસિદ્ધિકી સરસકાન્તિસુધાસમૃદ્ધિઃ ।
યદ્બિન્દુલેશકણીકાપરિણામભાગ્યાત્
સૌભાગ્યસીમપદમઞ્ચતિ પઞ્ચબાણઃ ॥ ૩.૫૯॥

આયામેન દૃશોર્વિશાલતરયોરક્ષય્યમાર્દ્રસ્મિત-
ચ્છાયાધર્ષિતશારદેન્દુલલિતં ચાપલ્યમાત્રં શિશોઃ ।
આયાસાનપરાન્વિધૂય રસિકૈરાસ્વાદ્યમાનં મુહુ-
ર્જીયાદુન્મદવલ્લવીકુચભરાધારં કિશોરં મહઃ ॥ ૩.૬૦॥

સ્કન્ધાવારસદો વ્રજઃ કતિપયે ગોપાસ્સહાયાદયઃ
સ્કન્ધાલમ્બિનિ વત્સદામ્નિ ધનદા ગોપાઙ્ગનાઃ સ્વાઙ્ગનાઃ ।
શ‍ૃઙ્ગારા ગિરિગૈરિકં શિવ શિવ શ્રીમન્તિ બર્હાણિ ચ
શ‍ૃઙ્ગગ્રાહિકયા તથાપિ તદિદં પ્રાહુસ્ત્રિલોકેશ્વરમ્ ॥ ૩.૬૧॥

શ્રીમદ્બર્હિશિખણ્ડમણ્ડનજુષે શ્યામાભિરામત્વિષે
લાવણ્યૈકરસાવસિક્તવપુષે લક્ષ્મીસરઃપ્રાવૃષે ।

લીલાકૃષ્ટરસજ્ઞધર્મમનસે લીલામૃતસ્રોતસે
કે વા ન સ્પૃહયન્તિ હન્ત મહસે ગોપીજનપ્રેયસે ॥ ૩.૬૨॥

આપાટલાધરમધીરવિલોલનેત્ર-
મામોદનિર્ભરિતમદ્ભુતકાન્તિપૂરમ્ ।
આવિસ્મિતામૃતમનુસ્મૃતિલોભનીય-
મામુદ્રિતાનનમહો મધુરં મુરારેઃ ॥ ૩.૬૩॥

જાગૃહિ જાગૃહિ ચેતશ્ચિરાય ચરિતાર્થાય ભવતઃ ।
અનુભૂયતામિદમિદં પુરઃ સ્થિતં પૂર્ણનિર્વાણમ્ ॥ ૩.૬૪॥

ચરણયોરરુણં કરુણાર્દ્રયોઃ કચભરે બહુલં વિપુલં દૃશોઃ ।
વપુષિ મઞ્જુલમઞ્જનમેચકે વયસિ બાલમહો મધુરં મહઃ ॥ ૩.૬૫॥

માલાબર્હમનોજ્ઞકુન્તલભરાં વન્યપ્રસૂનોક્ષિતાં
શૈલેયદ્રવક્લૃપ્તચિત્રતિલકાં શશ્વન્મનોહારિણીમ્
લીલાવેણુરવામૃતૈકરસિકાં લાવણ્યલક્ષ્મીમયીં
બાલાં બાલતમાલનીલવપુષં વન્દે પરાં દેવતામ્ ॥ ૩.૬૬॥

ગુરુ મૃદુપદે ગૂઢં ગુલ્ફે ઘનં જઘનસ્તલે
નલિનમુદરે દીર્ઘં બાહ્વોર્વિશાલમુરસ્થલે ।
મધુરમધરે મુગ્ધં વક્ત્રે વિલાસિ વિલોચને
બહુ કચભરે વન્યં વેષે મનોજ્ઞમહો મહઃ ॥ ૩.૬૭॥

જિહાનં જિહાનં સુજાનેન મૌગ્ધ્યં દુહાનં દુહાનં સુધાં વેણુનાદૈઃ ।
લિહાનં લિહાનં સુધીર્ઘૈરપાઙ્ગૈર્મહાનન્દસર્વસ્વમેતન્નમસ્તાત્ ॥ ૩.૬૮॥

લસદ્બર્હાપીડં લલિતલલિતસ્મેરવદનં
ભ્રમત્ક્રીડાપાઙ્ગં પ્રણતજનતાનિર્વૃતિપદમ્ ।
નવામ્ભોદશ્યામં નિજમધુરિમાભોગભરિતં
પરં દેવં વન્દે પરિમિલિતકૈશોરકરસમ્ ॥ ૩.૬૯॥

સારસ્યસામગ્ર્યમિવાનનેન માધુર્યચાતુર્યમિવ સ્મિતેન ।
કારુણ્યતારુણ્યમિવેક્ષિતેન ચાપલ્યસાફલ્યમિદં દૃશોર્મે ॥ ૩.૭૦॥

યત્ર વા તત્ર વા દેવ યદિ વિશ્વસિમસ્ત્વયિ ।
નિર્વાણમપિ દુર્વારમર્વાચીનાનિ કિં પુનઃ ॥ ૩.૭૧॥

રાગાન્ધગોપીજનવન્દિતાભ્યાં યોગીન્દ્રભૃઙ્ગેન્દ્રનિષેવિતાભ્યામ્ ।

આતામ્રપઙ્કેરુહવિભ્રમાભ્યાં સ્વામિન્ પદાભ્યામયમઞ્જલિસ્તે ॥ ૩.૭૨॥

અર્ધાનુલાપાન્વ્રજસુન્દરીણામકૃત્રિમાણાઞ્ચ સરસ્વતીનામ્ ।
આર્દ્રાશયેન શ્રવણાઞ્ચલેન સંભાવયન્તં તરુણં ગૃણીમઃ ॥ ૩.૭૩॥

મનસિ મમ સન્નિધત્તાં મધુરમુખા મન્થરાપાઙ્ગા ।
કરકલિતલલિતવંશા કાપિ કિશોરી કૃપા લહરી ॥ ૩.૭૪॥

રક્ષન્તુ નઃ શિક્ષિતપાશુપાલ્યા બાલ્યાવૃતા બર્હિશિખાવતંસાઃ ।
પ્રાણપ્રિયાઃ પ્રસ્તુતવેણુગીતાઃ શીતા દૃશોઃ શીતલગોપકન્યાઃ ॥ ૩.૭૫॥

સ્મિતસ્તબકિતાધરં શિશિરવેણુનાદામૃતં
મુહુસ્તરલલોચનં મદકટાક્ષમાલાકુલમ્ ।
ઉરસ્થલવિલીનયા કમલયા સમાલિઙ્ગિતં
ભુવસ્તલમુપાગતં ભુવનદૈવતં પાતુ નઃ ॥ ૩.૭૬॥

નયનામ્બુજે ભજત કામદુધં હૃદયામ્બુજે કિમપિ કારુણિકમ્ ।
ચરણામ્બુજે મુનિકુલૈકધનં વદનામ્બુજે વ્રજવધૂવિભવમ્ ॥ ૩.૭૭॥

નિર્વાસનં હન્ત રસાન્તરાણાં નિર્વાણસામ્રાજ્યમિવાવતીર્ણમ્ ।
અવ્યાજમાધુર્યમહાનિધાનમવ્યાદ્વ્રજાનામધિદૈવતં નઃ ॥ ૩.૭૮॥

ગોપીનામભિમતગીતવેષહર્ષાદાપીનસ્તનભરનિર્ભરોપગૂઢમ્ ।
કેલીનામવતુ રસૈરુપાસ્યમાનં કાલિન્દીપુલિનચરં પરં મહો નઃ ॥ ૩.૭૯॥

ખેલતાં મનસિ ખેચરાઙ્ગનામાનનીયમૃદુવેણુનિસ્વનૈઃ ।
કાનને કિમપિ નઃ કૃપાસ્પદં કાલમેઘકલહોદ્વહં મહઃ ॥ ૩.૮૦॥

એણીશાબવિલોચનાભિરલસશ્રોણીભરપ્રૌઢિભિ-
ર્વેણીભૂતરસક્રમાભિરભિતશ્શ્રેણીકૃતાભિર્વૃતઃ ।
પાણી દ્વૌ ચ વિનોદયન્ રતિપતેસ્તૂણીશયૈસ્સાયકૈ-
ર્વાણીનામપદં પરં વ્રજજનક્ષોણીપતિઃ પાતુ નઃ ॥ ૩.૮૧।

કાલિન્દીપુલિને તમાલનિબિડચ્છાયે પુરઃસંચરત્
તોયે તોયજપત્રપાત્રનિહિતં દધ્યન્નમશ્નાતિ યઃ ।
વામે પાણિતલે નિધાય મધુરં વેણું વિષાણં કટિ-
પ્રાન્તે ગાશ્ચ વિલોકયન્ પ્રતિકલં તં બાલમાલોકયે ॥ ૩.૮૨॥

યદ્ગોપીવદનેન્દુમણ્ડનમભૂત્ કસ્તૂરિકાપત્રકં

યલ્લક્ષ્મીકુચશાતકુંભકલશવ્યાકોશમિન્દીવરમ્ ।
યન્નિર્વાણનિધાનસાધનવિધૌ સિધ્ધાઞ્જનં યોગિનાં
તન્નઃ શ્યામલમાવિરસ્તુ હૃદયે કૃષ્ણાભિધાનં મહઃ ॥ ૩.૮૩।

ફુલ્લેન્દીવરકાન્તિમિન્દુવદનં બર્હાવતંસપ્રિયં
શ્રીવત્સાઙ્કમુદારકૌસ્તુભધરં પીતામ્બરં સુન્દરમ્ ।
ગોપીનાં નયનોત્પલાર્ચિતતનું ગોગોપસઙ્ઘાવૃતં
ગોવિન્દં કલવેણુનાદનિરતં દિવ્યાઙ્ગભૂષં ભજે ॥ ૩.૮૪॥

યન્નાભીસરસીરુહાન્તરપુટે ભૃઙ્ગાયમાનો વિધિ-
ર્યદ્વક્ષઃ કમલાવિલાસસદનં યચ્ચક્ષુષી ચેન્દ્વિનૌ ।
યત્પાદાબ્જવિનિઃસૃતા સુરનદી શંભોઃ શિરોભૂષણં
યન્નામસ્મરણં ધુનોતિ દુરિતં પાયાત્ સ નઃ કેશવઃ ॥ ૩.૮૫॥

રક્ષન્તુ ત્વામસિતજલજૈરઞ્જલિઃ પાદમૂલે
મીના નાભીસરસિ હૃદયે મારબાણાઃ મુરારેઃ ।
હારાઃ કણ્ઠે હરિમણિમયા વક્ત્રપદ્મે દ્વિરેફાઃ
પિઞ્છાચૂડાશ્ચિકુરનિચયે ઘોષયોષિત્કટાક્ષાઃ ॥ ૩.૮૬॥

દધિમથનનિનાદૈસ્ત્યક્તનિદ્રઃ પ્રભાતે
નિભૃતપદમગારં વલ્લવીનાં પ્રવિષ્ટઃ ।
મુખકમલસમીરૈરાશુ નિર્વાપ્ય દીપાન્
કબલિતનવનીતઃ પાતુ ગોપાલબાલઃ ॥ ૩.૮૭॥

પ્રાતઃ સ્મરામિ દધિઘોષવિનીતનિદ્રં
નિદ્રાવસાનરમણીયમુખારવિન્દમ્ ।
હૃદ્યાનવદ્યવપુષં નયનાભિરામ-
મુન્નિદ્રપદ્મનયનં નવનીતચોરમ્ ॥ ૩.૮૮॥

ફુલ્લહલ્લકવતંસકોલ્લસદ્વલ્લમાગમગવીગવેષિતમ્ ।
વલ્લવીચિકુરવાસિતાઙ્ગુલીપલ્લવં કમપિ વલ્લવં ભજે ॥ ૩.૮૯॥

સ્તેયં હરેર્હરતિ યન્નવનીતચૌર્યં જારત્વમસ્ય ગુરુતલ્પકૃતાપરાધમ્ ।
હત્યાં દશાનનહતિર્મધુપાનદોષં યત્પૂતનાસ્તનપયઃ સ પુનાતુ કૃષ્ણઃ ॥ ૩.૯૦॥

માર મા વસ મદીયમાનસે માધવૈકનિલયે યદૃચ્છયા ।
શ્રીરમાપતિરિહાગમેદસૌ કઃ સહેત નિજવેશ્મલઙ્ઘનમ્ ॥ ૩.૯૧॥

આકુઞ્ચિતં જાનુ કરં ચ વામં ન્યસ્ય ક્ષિતૌ દક્ષિણહસ્તપદ્મે ।
આલોકયન્તં નવનીતખણ્ડં બાલં મુકુન્દં મનસા સ્મરામિ ॥ ૩.૯૨॥

જાનુભ્યામભિધાવન્તં પાણિભ્યામતિસુન્દરમ્ ।
સુકુન્તલાલકં બાલં ગોપાલં ચિન્તયેદુષઃ ॥ ૩.૯૩॥

વિહાય કોદણ્ડશરૌ મુહૂર્તં ગૃહાણ પાણૌ મણિચારુવેણુમ્ ।
માયૂરબર્હં ચ નિજોત્તમાઙ્ગે સીતાપતે ત્વાં પ્રણમામિ પશ્ચાત્ ॥ ૩.૯૪॥

અયં ક્ષીરામ્ભોધેઃ પતિરિતિ ગવાં પાલક ઇતિ
શ્રિતોઽસ્માભિઃ ક્ષીરોપનયનધિયા ગોપતનયઃ ।
અનેન પ્રત્યૂહો વ્યરચિ સતતં યેન જનની-
સ્તનાદપ્યસ્માકં સકૃદપિ પયો દુર્લભમભૂત્ ॥ ૩.૯૫॥

હસ્તમાક્ષિપ્ય યાતોઽસિ બલાત્કૃષ્ણ કિમદ્ભુતમ્ ।
હૃદયાદ્યદિ નિર્યાસિ પૌરુષં ગણયામિ તે ॥ ૩.૯૬॥

તમસિ રવિરિવોદ્યન્મજ્જતામમ્બુરાશૌ
પ્લવ ઇવ તૃષિતાનાં સ્વાદુવર્ષીવ મેઘઃ ।
નિધિરિવ વિધનાનાં દીર્ઘતીવ્રામયાનાં
ભિષગિવ કુશલં નો દાતુમાયાતુ શૌરિઃ ॥ ૩.૯૭॥

કોદણ્ડં મસૃણં સુગન્ધિ વિશિખં ચક્રાબ્જપાશાઙ્કુશં
હૈમીં વેણુલતાં કરૈશ્ચ દધતં સિન્દૂરપુઞ્જારુણમ્ ।
કન્દર્પાધિકસુન્દરં સ્મિતમુખં ગોપાઙ્ગનાવેષ્ટિતં
ગોપાલં સતતં ભજામિ વરદં ત્રૈલોક્યરક્ષામણિમ્ ॥ ૩.૯૮॥

સાયઙ્કાલે વનાન્તે કુસુમિતસમયે સૈકતે ચન્દ્રિકાયાં
ત્રૈલોક્યાકર્ષણાઙ્ગં સુરનરગણિકામોહનાપાઙ્ગમૂર્તિમ્ ।
સેવ્યં શ‍ૃઙ્ગારભાવૈર્નવરસભરિતૈર્ગોપકન્યાસહસ્રૈ-
ર્વન્દેઽહં રાસકેલીરતમતિસુભગં વશ્યગોપાલકૃષ્ણમ્ ॥ ૩.૯૯॥

કદમ્બમૂલે ક્રીડન્તં વૃન્દાવનનિવેશિતમ્ ।
પદ્માસનસ્થિતં વન્દે વેણું ગાયન્તમચ્યુતમ્ ॥ ૩.૧૦૦॥

બાલં નીલામ્બુદાભં નવમણિવિલસત્ કિઙ્કિણીજાલબદ્ધ-
શ્રોણીજઙ્ઘાન્તયુગ્મં વિપુલરુરુનખપ્રોલ્લસત્કણ્ઠભૂષમ્ ।
ફુલ્લામ્ભોજાભવક્ત્રં હતશકટમરુત્ પૂતનાદ્યં પ્રસન્નં

ગોવિન્દં વન્દિતેન્દ્રાદ્યમરવરમજં પૂજયેદ્વાસરાદૌ ॥ ૩.૧૦૧॥

વન્દ્યં દેવૈર્મુકુન્દં વિકસિતકુરુવિન્દાભમિન્દીવરાક્ષં
ગોગોપીવૃન્દવીતં જિતરિપુનિવહં કુન્દમન્દારહાસમ્ ।
નીલગ્રીવાગ્રપિઞ્છાકલનસુવિલસત્કુન્તલં ભાનુમન્તં
દેવં પીતામ્બરાઢ્યં જપ જપ દિનશો મધ્યમાહ્નિ રમાયૈ ॥ ૩.૧૦૨॥

ચક્રાન્તધ્વસ્તવૈરિવ્રજમજિતમપાસ્તાવનીભારમાદ્યૈ-
રાવીતં નારદાદ્યૈર્મુનિભિરભિનુતં તત્ત્વનિર્ણીતિહેતોઃ ।
સાયાહ્ને નિર્મલાઙ્ગં નિરુપમરુચિરં ચિન્તયેન્નીલભાસં
રાત્રૌ વિશ્વોદયસ્થિત્યપહરણપદં મુક્તિદં વાસુદેવમ્ ॥ ૩. ૧૦૩॥

કોદણ્ડમૈક્ષવમખણ્ડમિષું ચ પૌષ્પં
ચક્રાબ્જપાશસૃણિકાઞ્ચનવંશનાલમ્ ।
વિભ્રાણમષ્ટવિધબાહુભિરર્કવર્ણં
ધ્યાયેદ્ધરિં મદનગોપવિલાસવેષમ્ ॥ ૩.૧૦૪॥

અઙ્ગુલ્યાઃ કઃ કવાટં પ્રહરતિ કુટિલે માધવઃ કિં વસન્તો
નો ચક્રી કિં કુલાલો ન હિ ધરણિધરઃ કિં દ્વિજિહ્વઃ ફણીન્દ્રઃ ।
નાહં ઘોરાહિમર્દી કિમસિ ખગપતિર્નો હરિઃ કિં કપીન્દ્રઃ
ઇત્યેવં ગોપકન્યાપ્રતિવચનજિતઃ પાતુ વશ્ચક્રપાણિઃ ॥ ૩.૧૦૫॥

રાધામોહનમન્દિરાદુપગતશ્ચન્દ્રાવલીમૂચિવાન્
રાધે ક્ષેમમયેઽસ્તિ તસ્ય વચનં શ્રુત્વાઽઽહ ચન્દ્રાવલી ।
કંસ ક્ષેમમયે વિમુગ્ધહૃદયે કંસઃ ક્વ દૃષ્ટસ્ત્વયા
રાધા ક્વેતિ વિલજ્જિતો નતમુખઃ સ્મેરો હરિઃ પાતુ વઃ ॥ ૩.૧૦૬॥

યા પ્રીતિર્વિદુરાર્પિતે મુરરિપો કુન્ત્યર્પિતે યાદૃશી
યા ગોવર્ધનમૂર્ધ્નિ યા ચ પૃથુકે સ્તન્યે યશોદાર્પિતે ।
ભારદ્વાજસમર્પિતે શબરિકાદત્તેઽધરે યોષિતાં
યા પ્રીતિર્મુનિપત્નિભક્તિરચિતેઽપ્યત્રાપિ તાં તાં કુરુ ॥ ૩.૧૦૭॥

કૃષ્ણાનુસ્મરણાદેવ પાપસઙ્ઘાતપઞ્જરઃ ।
શતધા મોઘમાયાતિ ગિરિર્વજ્રહતો યથા ॥ ૩.૧૦૮॥

યસ્યાત્મભૂતસ્ય ગુરોઃ પ્રસાદાદહં વિમુક્તોઽસ્મિ શરીરબન્ધાત્ ।
સર્વોપદેષ્ટુઃ પુરુષોત્તમસ્ય તસ્યાંઘ્રિપદ્મં પ્રણતોઽસ્મિ નિત્યમ્ ॥ ૩.૧૦૯॥

॥ ઇતિ શ્રીકૃષ્ણકર્ણામૃતે તૃતીયાશ્વાસઃ સમાપ્તઃ ॥

॥ ઇતિ શ્રીકૃષ્ણકર્ણામૃતં સમાપ્તમ્ ॥

---

Poet Bilwamangala (Leelashuka) lived during 1220-1300 AD. In the early days, he was very mu involved in a dasi by name Chintamani; once she told him that if he diverted even one percent of the attention he gave to her to Lord Krishna, he would attain salvation. This statement changed him completely, he became an ardent devotee of Lord Krishna, and obtained mukti throu his Guru Somagiri. He composed shrI Krishnakarnamrtam, beginning wi the words 'Chintamanirjayati.'

It contains three AshvAsas (chapters), and a total of 328 shlokas, (wi the addition of the extra slokas, the number of slokas will be: 112+109+112=333) ea one depicting an incident in the story of Krishna. The poem is full of literary beauties, and tongue-twisting alliterations, and many of the shlokas are well-known.

There is another version in the South. Fed up wi his relations wi the dasi, his wife makes him promise in front of the Lord that hencefor he will not tou another woman. In front of the Lord, he promisesd 'Henceforth, I will not tou any woman' and immediately left his wife and home and became a Krishna devotee.)

---

Notes :

AshvAsa 1 : In the book edited by Sri Sushil Kumar De

(Bengal version), there are 112 slokas in the 1st AshvAsa.
shloka No.100 (mandAramUle) in this version has been omitted.
3 extra slokas have been included in De's book as under:

૧ કિમિદમધરવીથીક્લૃપ્તવંશીનિનાદં
કિરતિ નયનયોર્નઃ કામપિ પ્રેમધારામ્ ।
તદિદમમરવીથીદુર્લભં વલ્લભં નઃ
ત્રિભુવનકમનીયં દૈવતં જીવિતં ચ  ॥ -  as shloka 72

૨ ધન્યાનાં સરસાનુલાપસરણીસૌરભ્યમભ્યસ્યતાં
કર્ણાનાં વિવરેષુ કામપિ સુધાવૃષ્ટિં દુહાનં મુહુઃ ।
વન્યાનાં સુદૃશાં મનોનયનયોર્મગ્નસ્ય દેવસ્ય નઃ
કર્ણાનાં વચસાં વિજૃમ્ભિતમહો કૃષ્ણસ્ય કર્ણામૃતમ્ ॥ - as shloka 111

૩ અનુગ્રહદ્વિગુણવિશાલલોચનૈરનુસ્મરન્ મૃદુમુરલીરવામૃતૈઃ ।
યતો યતઃ પ્રસરતિ મે વિલોચનં તતસ્તતઃ સ્ફુરતુ તવૈવ
વૈભવમ્ ॥ - as sloka 112

The resultant AshvAsa will have 112 slokas.

AshsvAsa 2 :  1 :  In the book  edited by Sri Sushil Kumar De
(Bengal version), there are 110 slokas in the 2nd AshvAsa.
The extra shloka in the book is as under:

મુગ્ધાં સ્નિગ્ધાં મધુરમુરલીમાધુરીધીર-નાદૈઃ
કારં કારં કરણવિવશં ગોકુલવ્યાકુલત્વમ્ ।
શ્યામં કામં યુવજનમનોમોહનં મોહનત્વં
ચિત્તે નિત્યં નિવસતુમહો વલ્લવી-વલ્લભં નઃ ॥  included as shloka 50.

AshvAsa 3:  Doubtful portions are in shlokas 25, 59 and 73 above.

*shrIkRiShNakarNAmRitam*

pdf was typeset on December 17, 2022

Please send corrections to *sanskrit@cheerful.com*